# भाषासोपानम्

## Contents


0. उपोद्घातः ........................................ 2

1. एषः, एतौ, एते … ........................................ 5

2. क्रियापदानि ........................................ 7

3. किं करोति ? (द्वितीयाविभक्तिः) ........................................ 12

4. तथास्तु ! (लोट् लकारः) ........................................ 17

.5 संबोधनम् ........................................ 21

6. न स्वभावः परिवर्तते (उपसर्गाः) ........................................ 24

7. धर्मक्षेत्रे किम् अकुर्वत, सञ्जय? (लङ् लकारः) ........................................ 29

8. संक्षेपरामायणम् ........................................ 35

9. सुभाषितानि ........................................ 38

10. श्वः भविष्यति! (लृट् लकारः) ........................................ 41

11. कुम्भमेला (तृतीयाविभक्तिः) ........................................ 44

12. पारितोषकम् (चतुर्थीविभक्तिः) ........................................ 50

13. पत्रं वृक्षात् पतति (पञ्चमीविभक्तिः) ........................................ 57

14. खट्वारूढः (षष्ठीविभक्तिः) ........................................ 62

15. कुञ्चिका कुत्र अस्ति ? (सप्तमीविभक्तिः) ........................................ 67

16. सङ्ख्याः ........................................ 73

17. धीरा बाला (विशेषण-विशेष्यसम्बन्धः) ........................................ 77

18. कथा ........................................ 86

# 0. उपोद्घातः

काञ्चन सूचनाः –

सर्वान् अभ्यासान् कुरुत ।

अधः चित्रपदकोषः (visual dictionary) दत्तः । यदा शब्दानाम् अर्थः न स्पष्टः, कोषः दृश्यताम् ।

**[Note: अत्र कार्यम् अग्रे क्रियते । साम्प्रतं किञ्चन रूपं दत्त्वा सरामः । ]**

चित्रपदकोषः

अ – अः

| | | | |
|---|---|---|---|
|  अङ्कनी | अतिथिः | | |
| | | | |
| | | | |
| | | | |
| | | | |

कवर्गः (क-ख-ग-घ-ङ)

| | | | |
|---|---|---|---|
|  कन्दुकम् | | | |
| | | | |
| | | | |

| | | | |
|---|---|---|---|
| | | | |

चवर्गः

| | | | |
|---|---|---|---|
|  चमसः |  छत्रम् | | छुरिका |
| | | | |
| | | | |
| | | | |

टवर्गः

| | | | |
|---|---|---|---|
| | | | |
| | | | |
| | | | |
| | | | |

तवर्गः

| | | | |
|---|---|---|---|
|  तक्षकः | | | |
| धेनुः | | | |
| | | | |

| | | | |
|---|---|---|---|
| | | | |

पवर्गः

| | | | |
|---|---|---|---|
| | | | |
| | | | |
| | | | |
| | | | |

य-ह

|  व्याघ्रः |  सिंहः |  शिशुः |  वृद्धः |
|---|---|---|---|
| | | | |
| | | | |
| | | | |
| | | | |

# 1. एषः, एतौ, एते ...

**अ) एतानि वाक्यानि उच्चैः पठत ।**

1) एषः बालकः । एतौ बालकौ । एते बालकाः ।

2) सः गजः । तौ गजौ । ते गजाः ।

3) सः व्याघ्रः । तौ ___________ । ते ___________ ।

4) एषः सिंहः । तौ ___________ । ते ___________ ।

5) सा वृद्धा । ते वृद्धे । ताः वृद्धाः ।

6) एषा लता । एते लते । एताः लताः ।

7) एषा बालिका । एते ___________ । एताः ___________ ।

8) तत् पुस्तकम् । ते पुस्तके । तानि पुस्तकानि ।

9) एतत् द्वारम् । एते ___________ । एतानि द्वाराणि ।

10) एषः कपिः । एतौ कपी । एते कपयः ।

11) एषः शिशुः । एतौ शिशू । एते शिशवः ।

12) सा धेनुः । ते धेनू । ताः धेनवः ।

13) एषः अतिथिः । एतौ ___________ । एते ___________ ।

14) सः गुरुः । तौ ___________ । ते ___________ ।

15) सा माता । ते मातरौ । ताः मातरः ।

16) सः पिता । तौ पितरौ । ते पितरः ।

17) सा नदी । ते नद्यौ । ताः नद्यः ।

18) सा लेखनी । ते ___________ । ताः ___________ ।

**आ) उत्तराणि लिखत ।**

1) कति वेदाः सन्ति ? ___________ वेदाः सन्ति ।

2) कति मासाः सन्ति ? ___________ मासाः सन्ति ।

3) कति नक्षत्राणि सन्ति ? ___________ नक्षत्राणि सन्ति ।

4) कति दिनानि सन्ति ? ___________ दिनानि सन्ति ।

5) कति ऋतवः सन्ति ? ___________ ऋतवः सन्ति ।

6) कति संवत्सराः सन्ति ? ___________ ___________ सन्ति ।

7) कति रवयः सन्ति ? ___________ ___________ ___________ ।

8) गजस्य कति पादाः सन्ति ? ___________ ___________ ___________ ___________ ।

9) दशरथस्य कति पुत्राः सन्ति? ___________ ___________ ___________ ।

10) सुमित्रायाः कति पुत्राः सन्ति? ___________ ___________ ___________ ।

11) धृतराष्ट्रस्य कति पुत्राः सन्ति? ___________ ___________ ___________ ।

**इदम् अवधेयम्**

नामपदानां, सर्वनामपदानां च त्रीणि वचनानि भवन्ति । तानि एकवचनं, द्विवचनं, बहुवचनं च इति ।

तेषां त्रीणि लिङ्गानि च भवन्ति । तानि पुंलिङ्गं, स्त्रीलिङ्गं, नपुंसकलिङ्गं च इति ।

**ज्ञानवर्धनम्**

- ऋतवः काः ?
- संवत्सराः के ?

Web मध्ये अन्वेषणं कुरुत !

# 2. क्रियापदानि

**अ) एतानि वाक्यानि उच्चैः पठत, रिक्तस्थानानि पूरयत च ।**

1) (एकः) बालः क्रीडति । (द्वौ) बालौ क्रीडतः । (बहवः) बालाः क्रीडन्ति ।

2) (एका) महिला गच्छति । (द्वे) महिले गच्छतः । (बह्व्यः) महिलाः गच्छन्ति ।

3) पुरुषः तिष्ठति । पुरुषौ तिष्ठतः । पुरुषाः ________ ।

4) फलं पतति । फले ________ । फलानि ________ ।

5) रामः वसति । रामौ ________ । रामाः ________ ।

6) अर्जुनः पृच्छति । ________ पृच्छतः । ________ पृच्छन्ति ।

7) सीता हसति । ________ हसतः । ________ हसन्ति ।

8) सः पठति । तौ ________ । ते ________ ।

9) सा गायति । ते गायतः । ताः गायन्ति ।

10) तत् ________ । ते ________ । तानि चलन्ति ।

**आ) एतानि वाक्यानि उच्चैः पठत, रिक्तस्थानानि पूरयत च ।**

1) पुत्रः शृणोति । पुत्रौ शृणुतः । पुत्राः शृण्वन्ति ।

2) सेवकः करोति । सेवकौ कुरुतः । सेवकाः ________ ।

3) कृष्णः जानाति । कृष्णौ जानीतः । कृष्णाः जानन्ति ।

4) सुधा क्रीणाति । सुधे क्रीणीतः । सुधाः क्रीणन्ति ।

5) हरिः जानाति । ________ जानीतः । ________ जानन्ति ।

6) शिशुः रोदिति । शिशू रुदितः । शिशवः रुदन्ति ।

7) माता सान्त्वयति । ________ सान्त्वयतः । ________ सान्त्वयन्ति ।

**इ) एतानि वाक्यानि उच्चैः पठत, रिक्तस्थानानि पूरयत च ।**

1) त्वं पिबसि । युवां पिबथः । यूयं पिबथ ।

2) अहं खादामि । आवां खादावः । वयं खादामः ।

3) त्वं करोषि । युवां कुरुथः । यूयं कुरुथ ।

4) त्वं शृणोषि । युवां ________ । यूयं ________ ।

5) त्वं क्रीणासि । युवां क्रीणीथः । यूयं क्रीणीथ ।

6) त्वं जानासि । युवां जानीथः । यूयं ________ ।

7) अहं करोमि । आवां कुर्वः । वयं कुर्मः ।

8) अहं शृणोमि । आवां शृण्वः । वयं शृण्मः ।

9) अहं क्रीणामि । आवां क्रीणीवः । वयं क्रीणीमः ।

10)अहं जानामि । आवां जानीवः । वयं ________ ।

11)गुरुः अस्ति । गुरू स्तः । गुरवः सन्ति ।

12)त्वम् असि । युवां स्थः । यूयं स्थ ।

13)अहम् अस्मि । आवां स्वः । वयं स्मः ।

**ई) एतानि वाक्यानि उच्चैः पठत, रिक्तस्थानानि पूरयत च ।**

1) बालः वर्धते । बालौ वर्धेते । बालाः वर्धन्ते ।

2) वानरः कूर्दते । वानरौ ________ । वानराः ________ ।

3) सः वन्दते । ________ वन्देते । ________ वन्दन्ते ।

4) रमा लोकते । रमे ________ । रमाः ________ ।

5) अग्निः प्रकाशते । अग्नी ________ । अग्नयः ________ ।

6) त्वं वर्धसे । युवां वर्धेथे । यूयं वर्धध्वे ।

7) त्वं वन्दसे । युवां वन्देथे । यूयं वन्दध्वे ।

8) त्वं मोदसे । युवां ________ । यूयं ________ ।

9) अहं वर्धे । आवां वर्धावहे । वयं वर्धामहे ।

10)वन्दे । आवां ________ । वयं ________ ।

11)अहं मोदे । आवां ________ । वयं ________ ।

## इदम् अवधेयम्

**लट् लकारः**

पठति, गच्छति, वदति, चलति, पश्यति, शृणोति इत्यादीनि वर्तमान-कालं बोधयन्ति । व्याकरणे 'लट् लकारः' इति व्यवहारः भवति । लट्-लकारस्य अर्थः वर्तमान-कालः इति ।

**धातुः**

पठति इति क्रियापदम् । तस्य मूलं पठ् इति ।

वदति इति क्रियापदम् । तस्य मूलं वद् इति ।

गच्छति इति क्रियापदम् । तस्य मूलं गम् इति ।

क्रियापदस्य मूलं 'धातुः' इत उच्यते । पठ्, वद्, गम्, चल् धातवः ।

**परस्मैपदी, आत्मनेपदी, उभयपदी**

पठ् (पठति), गम् (गच्छति), वद् (वदति), दृश् (पश्यति), श्रु (शृणोति) इत्यादयः परस्मैपदि-धातवः ।

रम् (रमते), डी (डीयते), वृध् (वर्धते), वृत् (वर्तते) इत्यादयः आत्मनेपदि-धातवः ।

केचन धातवः उभयपदि-धातवः । यथा कृ (करोति, कुरुते), पच् (पचति, पचते) इत्यादयः ।

**पुरुषः, वचनं च ।**

क्रियापदानां त्रयः पुरुषाः, त्रीणि वचनानि च भवन्ति । प्रथमपुरुषः, मध्यमपुरुषः, उत्तमपुरुषः च इति त्रयः पुरुषाः ; एकवचनं, द्विचनं, बहुवचनं चेति त्रीणि वचनानि । कोष्टके दत्तानि रूपाणि परिशीलयत ।

| पठ् (परस्मैपदी) | एकवचनम् | द्विवचनम् | बहुवचनम् |
| --- | --- | --- | --- |
| प्रथमपुरुषः | पठति | पठतः | पठन्ति |
| मध्यमपुरुषः | पठसि | पठथः | पठथ |
| उत्तमपुरुषः | पठामि | पठावः | पठामः |

| वन्द् (आत्मनेपदी) | एकवचनम् | द्विवचनम् | बहुवचनम् |
| --- | --- | --- | --- |
| प्रथमपुरुषः | वन्दते | वन्देते | वन्दन्ते |
| मध्यमपुरुषः | वन्दसे | वन्देथे | वन्दध्वे |
| उत्तमपुरुषः | वन्दे | वन्दावहे | वन्दामहे |

## गोपालस्य गृहे किं किं कुर्वन्ति?

गोपालः मम गृहस्य समीपे वसति । तस्य भार्या गीता । तयोः द्वौ पुत्रौ स्तः । प्रथमः पुत्रः रामः । द्वितीयः पुत्रः श्यामः । गीता प्रतिदिनं प्रातः पञ्चवादने उत्तिष्ठति । सा स्नानं करोति । ततः सा देवं वन्दते । अल्पाहारं पचति । गोपालः षड्वादने उत्तिष्ठति । सः पत्रिकां पठति । स्नानं करोति । देवं नमति । रामः श्यामः च सप्तवादने उत्तिष्ठतः । स्नानं कुरुतः । देवं वन्देते । रामः वदति "अद्य अहं खादितुं न इच्छामि । शालां शीघ्रं गच्छामि ।" इति । गीता तं वदति "यदि त्वं प्रतिदिनं प्रातः अल्पाहारं न खादसि तर्हि त्वं न वर्धसे । बालाः खादित्वा, दुग्धं पीत्वा एव सम्यक् वर्धन्ते ।" इति । रामः श्यामः च एतत् शृणुतः ।

ततः सर्वे अल्पाहारं खादन्ति । गोपालः कार्-यानेन तस्य कार्यालयं गच्छति । गीता च तस्याः कार्-यानेन तस्याः कार्यालयं गच्छति । रामः श्यामः च लोकयानं प्रति धावतः, लोकयानेन शालां गच्छतः ।

बालौ त्रिवादने गृहम् आगच्छतः । तौ अङ्गणे कन्दुकेन क्रीडतः । गोपालः पञ्चवादने गृहं आगच्छति । गीता आपणं गत्वा शाकान् क्रीणाति । ततः सा सार्धपञ्चवादने गृहम् आगच्छति । गोपालः गीता रामः श्यामः च सायङ्काले षड्वादनपर्यन्तं अङ्गणे क्रीडन्ति । ततः गीता भोजनं पचति । गोपालः च साहाय्यं करोति । ततः गोपालः बालौ पृच्छति "राम! श्याम ! अद्य युवां शालायां किं पठितवन्तौ ? गृहपाठम् इदानीं कुरुथः वा ?" इति । रामः श्यामः च वदतः "अद्य गणितकक्ष्यायां शिक्षकः नूतनं पाठं शिक्षितवान् । तस्य विषये गृहपाठं शीघ्रमेव कुर्वः" इति । गोपालः वदति "यदि युवां प्रतिदिनं सम्यक् पठथः लिखथः च तर्हि सर्वं सम्यक् जानीथः ।" इति । रामः सार्धनववादने गोपालं वदति "आवाम् इदानीम् अद्यतनं गृहपाठं कृतवन्तौ ।" इति । गोपालः वदति

"इदानीं वयं किञ्चित् गायामः, दूरदर्शनं पश्यामः, देवं वन्दामहे, ततः निद्रां कुर्मः" इति । ततः ते किञ्चित् गायन्ति, दूरदर्शनं पश्यन्ति, देवं वन्दन्ते, निद्रां कुर्वन्ति च ।

**उ) कोष्टकं दृष्ट्वा शुद्धं वा अशुद्धं वा इति लिखत**

| | | **शद्धम् / अशुद्धम्** | **विवरणम्** |
|---|---|---|---|
| १. | पठति | शद्धम् | पठ् धातुः परस्मैपदी |
| २. | गच्छते | अशद्धम् | गम् परस्मैपदी, न आत्मनेपदी |
| ३. | डीयति | अशद्धम् | डी आत्मनेपदी, न परस्मैपदी |
| ४. | वर्तते | शद्धम् | वृत् आत्मनेपदी, न परस्मैपदी |
| ५. | वदते | | |
| ६. | अस्ते | | |
| ७. | भवति | | |
| ८. | कूर्दते | | |
| ९. | क्रीणाति | | |
| १०. | रमन्ते | | |
| ११. | करोमि | | |
| १२. | वदामि | | |
| १३. | वदामहे | | |

# 3. किं करोति ?                    (द्वितीयाविभक्तिः)

**एतानि वाक्यानि उच्चैः पठत ।**

1. चित्रकारः चित्रं रचयति ।
2. आरक्षकः चोरं गृह्णाति ।
3. विदूषकः जनान् रञ्जयति ।
4. गायकः गीतं गायति ।
5. गोपालकः धेनूः पालयति ।
6. हस्तिपकः गजं चालयति ।
7. चालकः लोकयानं चालयति ।
8. लेखकः लेखनानि लिखति ।
9. सैनिकः देशं रक्षति ।
10. तक्षकः उत्पीठिकाः विनिर्माति ।
11. भिक्षुकः भिक्षां याचते ।
12. लोहकारः लोहं तापयति ।
13. पत्रकारः वार्तां सङ्गृह्णाति ।
14. सौचिका वस्त्राणि सीव्यति ।
15. नृपः प्रजाः पालयति ।
16. श्रोता गीतं शृणोति । (श्रोता कः ? यः शृणोति सः श्रोता ।)
17. ग्राहिका शाटिकां क्रीणाति ।
18. आपणिकः शाटिकां विक्रीणीते ।

**अ) उपरिस्थेषु वाक्येषु यानि क्रियापदानि सन्ति तानि रिक्तस्थानेषु लिखत ।**

| | | | | | |
|---|---|---|---|---|---|
| पालयति | | | | | |
| | | | | | |
| | | . | | | |

**एतत् पद्यं पठत - कः किं करोति?**

याचते भिक्षुकः भिक्षां
प्रयच्छति धनं जनः ।
करोति नर्तकः नृत्यं
नृत्यं पश्यति वीक्षकः ॥

दुर्जनः बाधते देशं
देशं रक्षति सैनिकः ।
नृपः प्रजाः पालयति
नमन्ति खलु तं प्रजाः ॥

धेनुं रक्षति गोपालः
माता पोषयति बालकम् ।
गुरुः शास्त्रं बोधयति
शिष्यः पठति पुस्तकम् ॥

**इदम् अवधेयम्**

"बालकः पाठं पठति ।" इति अस्मिन् वाक्ये –

पठति इति **क्रियापदं**, बालकः इति **कर्तृपदं,** पाठम् इति **कर्मपदम्** च ।

कर्तृपदं प्रथमाविभक्त्यन्तं भवति । कर्मपदं द्वितीयाविभक्त्यन्तं च भवति ।

संस्कृते पदानि क्रमेण एव लेखनीयानि इति न । क्रमस्य परिवर्तनेन अर्थपरिवर्तनं न भवति । यथा -

"बालकः पाठं पठति ।", "पठति बालकः पाठम् ।", "पाठं बालकः पठति ।" इत्यादीनि वाक्यानि समानार्थकानि ।

**आ) पद्यं दृष्ट्वा वाक्यानि पूरयत।**

यथा - भिक्षुकः भिक्षां याचते।

1) __________ धनं __________।

2) __________ __________ करोति।

3) __________ __________ पश्यति।

4) दुर्जनः __________ __________।

5) सैनिकः __________ __________।

6) __________प्रजाः __________।

7) __________ तं __________।

8) गोपालः __________ __________।

9) __________ __________ पोषति।

10)गुरुः __________ __________।

11)__________ पुस्तकं __________।

**एतत् सुभाषितं पठत, कण्ठस्थीकुरुत च।**

यः पठति लिखति पश्यति परिपृच्छति पण्डितानुपाश्रयति।
तस्य दिवाकरकिरणैर्नलिनीदलमिव विकास्यते बुद्धिः॥

यः सर्वदा पठति, लिखति, पश्यति, प्रश्नान् पृच्छति, पण्डितान् सेवते च तस्य बुद्धिः विकसति। कथम्? यथा सूर्यकिरणैः नलिनीपुष्पं विकसति।

**एतानि द्वितीया-विभक्ति-रूपाणि पठत । कोष्टकं पुनः पुनः पठत । लघूनि वाक्यानि च वदत ।**

**उदाहरणम् –** अश्वम् – अश्वौ – अश्वाः –अहम् अश्वम् आरोहामि । अहम् अश्वौ पश्यामि । अहम् अश्वान् पश्यामि।

| प्रातिपदिकम् / लिङ्गम् | प्रथमा-विभक्तिः, एकवचनम् | द्वितीया-विभक्तिः, एकवचनम् | द्वितीया-विभक्तिः, द्विवचनम् | द्वितीया-विभक्तिः, बहुवचनम् |
|---|---|---|---|---|
| अश्व (अकारान्तः पुंलिङ्गशब्दः) | अश्वः | अश्वम् | अश्वौ | अश्वान् |
| भिक्षा (आकारान्तः स्त्रीलिङ्गशब्दः) | भिक्षा | भिक्षाम् | भिक्षे | भिक्षाः |
| चित्र (अकारन्तः नपुंसकलिङ्गशब्दः) | चित्र | चित्रम् | चित्रे | चित्राणि |
| तक्षक (अ. पुं.) | तक्षकः | तक्षकम् | तक्षकौ | तक्षकान् |
| अतिथि (इ. पुं.) | अतिथिः | अतिथिम् | अतिथी | अतिथीन् |
| शिशु (उ. पुं.) | शिशुः | शिशुम् | शिशू | शिशून् |
| मातृ (ऋ. स्त्री.) | माता | मातरम् | मातरौ | मातॄः |
| पितृ (ऋ. पुं.) | पिता | पितरम् | पितरौ | पितॄन् |
| मति (इ. स्त्री.) | मतिः | मतिम् | मती | मतीः |
| नदी (ई. स्त्री.) | नदी | नदीम् | नद्यौ | नदीः |
| तद् ; किम् (पुं.) | सः - कः | तम् - कम् | तौ – कौ | तान् – कान् |
| तद् ; किम् (स्त्री.) | सा - का | ताम् - काम् | ते – के | ताः – काः |
| तद् ; किम् (न.) | तत् - किम् | तत् - किम् | ते – के | तानि – कानि |
| युष्मद् (दकारान्तः उभयलिङ्गशब्दः) | त्वम् | त्वाम् / त्वा | युवाम् / वाम् | युष्मान् / वः |
| अस्मद् (दकारान्तः उभयलिङ्गशब्दः) | अहम् | माम् / मा | आवाम् / नौ | अस्मान् / नः |

**इ) एतेषां द्वितीया-विभक्ति-रूपाणि त्रिषु वचनेषु वदत, लिखत च**

यथा -

1) पुस्तकम् (अ. नपुं.) - पुस्तकम् पुस्तके पुस्तकानि
2) लेखनी (ई. स्त्री.) -

3) चषकः (अ. पुं.) -
4) नदी (ई. स्त्री.) -
5) स्वसा (ऋ. स्त्री.) -
6) दूरभाषा (आ. स्त्री.) -
7) हस्तः (अ. पुं.) -
8) अङ्कनी (ई. स्त्री.) -
9) शत्रुः (उ. पुं.) -
10) बुद्धिः (इ. स्त्री.) -
11) प्रकृतिः (इ. स्त्री.) -
12) सन्धिः (इ. पुं.) –

**ई) कथां वदत ।**

काकस्य कथा (Outline hint: काकः पिपासितः .... घटं पश्यति ... किञ्चित् जलम् अस्ति ...उपायं करोति ...घटे शिलाखण्डं क्षिपति ...)

# 4. तथास्तु !                                    (लोट् लकारः)

**एतानि वाक्यानि  उच्चैः पठत**

बालकः पठतु । बालकौ पठताम् । बालकाः पठन्तु ।

बालिका पठतु । बालिके पठताम् । बालिकाः पठन्तु ।

नदी वहतु । नद्यौ वहताम् । नद्यः वहन्तु ।

मित्रम् गच्छतु । मित्रे गच्छताम् । मित्राणि गच्छन्तु ।

अश्वः धावतु । अश्वौ धावताम् । अश्वाः धावन्तु ।

मुनिः जपतु । मुनी जपताम् । मुनयः जपन्तु ।

गुरुः वदतु ।  गुरू वदताम् । गुरवः वदन्तु ।

**अ) रिक्तस्थानानि पूरयत ।**

1) भक्तः नमतु । ________ नमताम् । ________ नमन्तु ।

2) मत्स्यः तरतु । ________ ________ । ________ ________ ।

3) बालिका उपविशतु । ________ ________ । ________ ________ ।

4) सिंहः गर्जतु । ________ ________ ।________ ________ ।

5) सा लिखतु । ________ ________ । ________ ________ ।

6) माता पृच्छतु । मातरौ ________ । मातरः ________ ।

7) पिता नयतु । ________ ________ । ________ ________ ।

8) हरिः आगच्छतु । ________ ________ । ________ ________ ।

**आ) एतानि वाक्यानि उच्चैः पठत , रिक्तस्थानानि पूरयत च ।**

1) बालिका करोतु । बालिके कुरुताम् । बालिकाः कुर्वन्तु ।

2) छात्रः शृणोतु । छात्रौ शृणुताम् । छात्राः शृण्वन्तु ।

3) शिशुः मा रोदितु । शिशू मा रुदिताम् । शिशवः मा रुदन्तु ।

4) माता ददातु । मातरौ ददताम् । मातरः ददतु ।

5) बालकः स्वीकरोतु । बालकौ ________ । बालकाः ________ ।

6) गायकः गायतु । गायकौ ________ । गायकाः ________ ।

7) महिला शृणोतु । महिले ________ । महिलाः ________ ।

**इ) एतानि वाक्यानि उच्चैः पठित्वा, रिक्तस्थानानि पूरयत च ।**

1) त्वं पठ । युवां पठतम् । यूयं पठत ।

2) त्वं गच्छ । युवां ________ । यूयं ________ ।

3) त्वं कुरु । युवां कुरुतम् । यूयं कुरुत ।

4) त्वं शृणु । ________ शृणुतम् । ________ ________ ।

**ई) एतानि वाक्यानि उच्चैः पठित्वा, रिक्तस्थानानि पूरयत च ।**

1) अहं वदानि । आवां वदाव । वयं वदाम ।

2) अहं नयानि । आवां नयाव । वयं नयाम ।

3) अहं पठानि । आवां ________ । वयं ________ ।

4) अहम् उपविशानि । ________ ________ । ________ ________ ।

5) अहम् उत्तिष्ठानि । आवाम् ________ । वयम् ________ ________ ।

6) अहम् आनयानि । आवाम् ________ । वयम् ________ ।

7) अहं करवाणि । आवां करवाव । वयं करवाम ।

**उ) एतानि वाक्यानि उच्चैः पठत ।**

1) कः वदतु? बालकः वदतु ।

2) बालकः किं वदतु? बालकः श्लोकं वदतु ।

3) बालिका अनुजम् आह्वयतु । बालिके अनुजम् ________ । बालिकाः अनुजम् ________ |

4) त्वं पुस्तकं पठ । युवां पुस्तकं पठतम् । यूयं पुस्तकं पठत ।

5) त्वं भोजनं खाद । युवां भोजनं ________ । यूयं भोजनं ________ ।

6) त्वं फलरसं पिब । युवां फलरसं ________ । यूयं फलरसं ________ ।

7) त्वं स्यूतं नय । युवां स्यूतं ________ । यूयं स्यूतं ________ ।

**एतत् संभाषणं पठन्तु**

सुरेशः गिरीशं दूरवाण्या आह्वयति ।

सुरेशः - नमस्ते । अहं सुरेशः वदामि ।

गिरीशः - अहो! कथम् अस्ति, सुरेश?

सुरेशः - अहं कुशली । अपि सर्वं कुशलम्?

गिरीशः - आम् । आम् ।

सुरेशः - गिरीश, भानुवासरे मम गृहे खादमोदता भविष्यति । भवान् आगच्छतु !

गिरीशः - मित्र सुरेश, निश्चयेन आगच्छामि ।

सुरेशः - पत्न्या सह आगच्छति किल ?

गिरीशः - तां पृच्छामि ।

सुरेशः - अस्तु । मिलाम ।

गिरीशः पत्नीं नलिनीं वदति ।

गिरीशः - हे नलिनि, गिरीशस्य आह्वानम् आसीत् ।

नलिनी - कथम् अस्ति सः ?

गिरीशः - सम्यक् । परश्वः तस्य गृहे खादतमोदता भविष्यति । आवां गच्छाव ?

नलिनी - अहं खादतमोदतां गन्तुम् इच्छामि । अपि च तैः मिलित्वा कानिचन दिनानि अतीतानि । अन्ये के आगमिष्यन्ति इति जानाति किम् ?

गिरीशः - न जाने । खादतमोदतायाम् अन्यानि मित्राणि अपि भविष्यन्ति इति मन्ये ।

नलिनी - अस्तु ।

**ऊ) एतेषां प्रश्नानाम् उत्तरं वदत, लिखत च ।**

1) खादतमोदता कदा भविष्यति ?

2) खादतमोदता कुत्र भविष्यति ?

3) सुरेशः गिरीशं कदा आहूतवान् ?

4) गिरीशः, नलिनी च खादमोदतां गच्छतः किम् ?

# 5. संबोधनम्

भोः मित्र, आगच्छ ! [चित्रम्]

अयि सखि ! शृणु ! [चित्रम्]

हे पुत्र ! पठ ! [चित्रम्]

**इदम् अवधेयम्**

- सम्बोधनस्य प्रयोगः सूचनार्थं भवति ।
- सम्बोधनरूपात् पूर्वं 'भोः, हे, रे, अये' इत्यादीनि कदाचित् प्रयुज्यन्ते ।
- आदरं सूचयितुं प्रायः आर्य-वर्य-महोदय-महाभाग-शब्दाः योज्यन्ते । यथा –
    - पुंलिङ्गे – राजेशवर्य ! सुधीरमहोदय ! राकेशमहाभाग ! हरिवर्य ! गुरुवर्य !
    - स्त्रीलिङ्ग्गे – लतावर्ये ! गीतामहोदये ! लक्ष्मीभगिनि !
- नामनिर्देशं विना अपि प्रयोगः भवति ।
    - पुंलिङ्गे – वर्य / मान्य / महोदय / महाभाग / आर्य / श्रीमन् इत्यादीनि भवन्ति ।
    - स्त्रीलिङ्गे – वर्ये / मान्ये / महोदये / भगिनि / आर्ये इत्यादीनि भवन्ति ।

**कोष्टाके सम्बोधनरूपाणि दत्तानि सन्ति । तानि उच्चैः पठत ।**

कोष्टके 'हे' इत्यस्य प्रयोगः सम्बोधनायाः स्पष्टतार्थम् । 'हे राम' इत्यस्य स्थाने 'राम' इत्यपि साधु ।

| प्रातिपदिकम् / लिङ्गम् | प्रथमा-विभक्तिः, एकवचनम् | सम्बोधना-प्रथमा-विभक्तिः, एकवचनम् | सम्बोधना-प्रथमा-विभक्तिः, द्विवचनम् | सम्बोधना-प्रथमा-विभक्तिः, बहुवचनम् |
|---|---|---|---|---|
| राम (अकारान्तः पुंलिङ्गशब्दः) | रामः | हे राम | हे रामौ | हे रामाः |
| लता (आकारान्तः स्त्रीलिङ्गशब्दः) | लता | हे लते | हे लते | हे लताः |
| मित्र (अकारन्तः नपुंसकलिङ्गशब्दः) | मित्रम् | हे मित्र | हे मित्रे | हे मित्राणि |

| | | | | |
|---|---|---|---|---|
| अतिथि (इ. पुं.) | अतिथिः | हे अतिथे | हे अतिथी | हे अतिथयः |
| शिशु (उ. पुं.) | शिशुः | हे शिशो | हे शिशू | हे शिशवः |
| मातृ (ऋ. स्त्री.) | माता | हे मातः | हे मातरौ | हे मातरः |
| पितृ (ऋ. पुं.) | पिता | हे पितः | हे पितरौ | हे पितरः |
| मति (इ. स्त्री.) | मतिः | हे मते | हे मती | हे मतयः |
| नदी (ई. स्त्री.) | नदी | हे नदि | हे नद्यौ | हे नद्यः |
| श्रीमत् ; (त. पुं.) | श्रीमान् | हे श्रीमन् | हे श्रीमन्तौ | हे श्रीमन्तः |
| भवत् ; (त. पुं.) | भवान् | हे भवन् | हे भवन्तौ | हे भवन्तः |
| भवत् ; (त, स्त्री.) | भवती | हे भवति | हे भवत्यौ | हे भवत्यः |

**अ) त्रिषु वचनेषु सम्बोधनरूपाणि वदत ।**

(उदाहरणम्) शिशुः – शिशो शिशू शिशवः

1) बालकः –

2) बालिका –

3) रविः –

4) पटुः –

5) बुद्धिः –

6) माता –

7) भगिनी –

8) गुरुः –

9) दाशरथिः –

10) मित्रम् –

**आ) आवरणे दत्तेन पदेन रिक्तस्थानानि पूरयत ।**

1) भोः ____________, चित्रं पश्यतु । [रमेशः]

2) अस्तु, ____________, श्वः वदाव। [गणपतिः]

3) भक्तः "____________, मां पाहि" इति प्रार्थयते। [शंभुः]

4) यदा माता "____________, आगच्छ, भोजनं कुरु" इति उक्तवती, तदा अहम् "अचिरम् आगच्छामि ____________," इति प्रत्युक्तवती। [पुत्री, माता]

5) "भो ____________, अलं क्रीडया। पाठं पठत " इति आचार्यः छात्रान् आदिष्टवान्। [छात्राः]

6) महाराजः "____________, युद्धार्थं सिद्धतां कुरु" इति सेनापतिम् आज्ञापितवान्। [सेनापतिः]

7) "____________ [नलिनी], ____________ [रेखा], उत्तिष्ठताम्। सप्तवादनं जातम्! ____________ [चक्रपाणिः], त्वमपि उत्तिष्ठ। ____________ [कोकिला] दन्तधावनं कृतं वा ?

# 6. न स्वभावः परिवर्तते (उपसर्गाः)

**एतां कथाम् उच्चैः पठत**

कश्चन राजा अस्ति । सः गर्विष्ठः, मूर्खः, अविवेकी च । सः सर्वदा आत्मप्रशंसां करोति, इतरान् अवमानयति च । "कथञ्चित् स्वसामर्थ्यं प्रदर्शयामि," इति सः विचिन्तयति ।

एकस्मिन् दिने सः सेवकान् आह्वयति, आदिशति च "कानिचन निम्बकबीजानि आनयन्तु, तेषां वपनार्थं ब्रुहत् आलवालं विरचयन्तु " इति । सेवकाः महाराजस्य उद्देशं न अवगच्छन्ति, परन्तु तस्य आदेशं परिपालयन्ति एव । महाराजः निम्बकबीजानि आलवाले संस्थापयति । तेषां पोषणार्थं रुचिवर्धनार्थं च सः प्रतिदिनं जलसेचनसमये जलेन सह शर्करां, गुडं, क्षीरं, मधु इत्यादीनि मधुरवस्तूनि अपि सङ्कलयति । "एतैः मधुरद्रव्यैः अहं निम्बकस्य स्वाभाविकरुचिमेव परिवर्तयामि, मम सामर्थ्यं च प्रदर्शयामि" इति अहङ्कारेण उद्घोषयति ।

कानिचन मासानि अतीतानि । निम्बकसस्यमेकं प्रथमवारं फलति । महाराजः उत्साहेन निम्बकफलानि सञ्चिनोति, सर्वेभ्यः वितरति । स्वयं फलखण्डमेकं मुखे निवेशयति । यदा सर्वे जनाः महाराजम् अनुकुर्वन्ति, तेषां सर्वेषां मुखानि निम्बकस्य तिक्तरुचिना वक्रतां यान्ति । सर्वे उच्चैः उद्घोषयन्ति च --
"न स्वभावः परिवर्तते।" सः अविवेकी राजा लज्जया मुखम् अवनमयति ।

[ अत्र चित्राणि स्थापयितव्यानि ]
चित्राणाम् अधः सूचयितव्यानि वाक्यानि---
पुरुषः गच्छति । पुरुषः आगच्छति । युवकः धावति । बालकः अनुधावति ।

**अधस्तनानि वाक्यानि पठत ।**

( पिता पुत्रं नयति)। १. गृहस्थः अतिथिम् आनयति । २. रामः सीतां परिणयति ।

( रामः वनं गच्छति)। १. लक्ष्मणः तम् अनुगच्छति । २. सुमन्त्रः आगच्छति। ३. भरतः निर्गच्छति ।

(अद्य उत्सवः वर्तते)। १. कार्यक्रमः प्रवर्तते । १०. भाषणम् अनुवर्तते । ११. सर्वे प्रतिनिवर्तन्ते ।

उपरितनवाक्येषु नयति, गच्छति, वर्तते इत्यादीनि क्रियापदानि, "आ, अनु, परि, प्र, निर्, प्रति-नि " इत्यादिभिः उपसर्गैः युक्तानि सन्ति । तेषाम् अर्थोऽपि परिवर्तितः दृश्यते ।

**उपसर्गाः के ?**

- उपसर्गाः द्वाविंशतिः (२२) सन्ति । ते च –
    - प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आ, नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप ।
- (क) "अलम्, बहिस्, अन्तर्-"  (ख) "स्वी, उष्णी, सज्जी,"-- इत्यादयः अपि उपसर्गतुल्याः एव भवन्ति
    - (क) अलम् + करोति = अलङ्करोति ।  (ख) स्वी + करोति = स्वीकरोति ।
      बहिस् + करोति = बहिष्करोति ।  उष्णी + करोति = उष्णीकरोति ।
      अन्तर् + भवति = अन्तर्भवति ।  सज्जी + करोति = सज्जीकरोति ।

**उपसर्ग-नियमाः -**

अ) उपसर्गः धातोः पूर्वं भवति । यथा -

आ + गच्छति = आगच्छति ।

आ) उपसर्गेण कदाचित् धातोः अर्थः परिवर्तते । यथा -

स्मरति - विस्मरति ।
नयति - आनयति ।

इ) कदाचित् उपसर्गः धातोः अर्थस्य पोषणं करोति । यथा –

शोभते - सुशोभते ।
लिखति - विलिखति ।

ई) कदाचित् धातोः पूर्वं द्वित्राः उपसर्गाः भवन्ति । यथा -

प्रति + आ + गच्छति = *प्रत्यागच्छति ।
निर् + आ + करोति = निराकरोति ।
सम् + उत् + आ + हरति = *समुदाहरति ।
वि + अव + स्थापयति = *व्यवस्थापयति ।

* (उपसर्ग-धातु-संयोगसमये सन्दर्भानुसारम् सन्धयः अपि सम्भवन्ति) ।

उ) उपसर्गकारणतः कदाचित् परस्मैपदिधातवः आत्मनेपदिरूपम्, आत्मनेपदिधातवः परस्मैपदिरूपं च प्राप्नुवन्ति । यथा -

वि + जयति (परस्मैपदी) -> विजयते (आत्मनेपदी) ।

प्र + तिष्ठति ( परस्मै- ) -> प्रतिष्ठते (आत्मनेपदी) ।

सम् + गच्छति (परस्मै- ) -> संगच्छते (आत्मनेपदी) ।

वि + रमते (आत्मनेपदी ) -> विरमति (परस्मैपदी) ।

ऊ) धातुः यदि उपसर्गसहितः भवति, तर्हि क्त्वा-प्रत्ययस्य स्थाने ल्यप्-प्रत्ययः भवति । यथा -

गच्छति → गत्वा ,    स्मरति → स्मृत्वा,    नयति → नीत्वा ।

आगच्छति →आगत्य,  विस्मरति →विस्मृत्य,   आनयति →आनीय ।

**अभ्यासाः**

**अ)  उपसर्गसहितधातूनां लट्लकाररूपाणि लिखत ।**

उदा -- प्रति + गम् =  प्रतिगच्छति,  अनु + भू = अनुभवति,  उत् + स्था = उत्तिष्ठति ।

1) परि + प्रच्छ्  =  ______________
2) अधि + स्था = ______________
3) उप + कृ = ______________
4) उप + विश् = ______________
5) आ + ह्वै (ह्वय्) = ______________
6) निर् + गम् (गच्छ) =  ______________
7) अप + सृ (सर) = ______________
8) परि + पाल् = ______________
9) उत् + नी (नय) = ______________
10) सम् + सूच् = ______________

**आ) उपसर्गयुक्तैः लट्लकाररूपैः रिक्तस्थानानि पूरयत ।**

उदा ---  छात्रः गुरुं "प्रणमति" । (प्र + नम्)

1) सचिवः विदेशात् ______________ । (प्रति + आ + गम्)

2) सैनिकाः शत्रून्  ______________ । (सम् + हृ)

3) माता पुत्रान्  ______________ । (परि + पाल्)

4) अहं वारं वारम्  ______________ । (उत् + पत्)

5) विष्णुः वैकुण्ठम्  ______________ । (अधि + वस्)

6) बालिके पाठं  ______________ । (वि + स्मृ)

7) चित्रकारौ चित्राणि _____________ । (वि + लिख्)

8) छात्राः शिक्षकं _____________ । (परि + पृच्छ्)

9) ऋषिः धनं _____________ । (निर् + आ + कृ)

10) गङ्गा हिमालयात् _____________ । (निस् + सृ)

**उपसर्ग-सहित-क्रियापदानां भूतकृदन्तरूपाणि (पुंलिङ्गे)**

आगच्छति - आगतवान्,

अनुकरोति - अनुकृतवान्,

परिहरति - परिहृतवान्.

उपविशति – उपविष्टवान्

**इ) उपसर्गयुक्तैः उचित-भूतकृदन्तरूपैः वाक्यानि पूरयत ।**

उदा. --(१) बालकः ज्येष्ठान् "अनुकृतवान्" । (अनु + कृ)--(२). बालिका मातरम् अनुसृतवती । (अनु + सृ)

1) दुष्यन्तः शकुन्तलां _____________ । (वि + स्मृ)

2) वानराः वृक्षात् _____________ । (नि + पत्)

3) ते प्रातःकाले शीघ्रम् _____________ । (उत् + स्था)

4) जनाः दैवम् _____________ । (अव + नम्)

5) महिला विषयम् _____________ । (अव+ गम्)

6) नार्यः आसन्दे _____________ । (उप + विश्)

**ई) उदाहरणनुगुणं ल्यबन्तरूपैः वाक्यानि योजयत ।**

उदा. - छात्रः विद्यालयं प्रविष्टवान्, पुस्तकं पठितवान् ।--छात्रः विद्यालयं प्रविश्य पुस्तकं पठितवान् ।

1) तौ आगमिष्यतः, भोजनं करिष्यतः ।

2) साधवः आसने उपविशन्ति, ध्यायन्ति ।

3) भवान् सरस्वतीं प्रणमतु, पठतु ।

4) यूयं सर्वे स्थालिकाः प्रक्षालयत, भोजनं खादत ।

5) हनूमान् सञ्जीविनीपर्वतम् उन्नीतवान्, आनीतवान् ।

**उ) अधः काचित् घटना निरूपिता अस्ति । पठित्वा आवरणेषु दत्तानां पदानां क्त्वान्तरूपाणि ल्यबन्तरूपाणि वा यथोचितं रिक्तस्थानेषु लिखत ।**

सुरेशः प्रातः विलम्बेन *उत्थाय* (उत्थितवान्), शीघ्रं मुखं _____________ (प्रक्षालितवान्), स्नानमपि *कृत्वा* (कृतवान्), आसने _____________ (उपविष्टवान्), ध्यानं कृतवान् । त्वरया भोजनं _____________ (समापितवान्), पुस्तकस्यूतं _____________ (विस्मृतवान्) विद्यालयं गतवान्।

यदा वर्गप्रकोष्टं _____________ (प्रविष्टवान्), अध्यापकं_____________ (दृष्टवान्), भीत्या पृष्ठतः स्थितवान्, तदा अध्यापकः सुरेशं _____________ (आहूतवान्) शान्तस्वरेण " सुरेश ! निर्भयेन आसने _____________ (उपविशतु), अवधानेन पाठं _____________ (शृणोतु), सम्यक् _____________ (विचिन्तयतु) पुनः पुनः मननं _____________ (करोतु)" इति उक्तवान् । सुरेशः गृहं गत्वा पुस्तकं _____________ (पठितवान्), पठितं विषयं एकवारं _____________ (वि +लिख्) मनसि सम्यक् _____________ (संस्थापितवान्), तृप्तिम् _____________ (अनुभूतवान्), आनन्देन निद्रां कृतवान् ।

# 7. धर्मक्षेत्रे किम् अकुर्वत, सञ्जय? (लङ् लकारः)

पठति, गच्छति, करोति, पश्यति, डयते, वन्दते इत्यादीनि क्रियापदानि वर्तमान-कालं सूचयन्ति । 'लट् लकारः' इति अपि वदामः । अनद्यतन-भूतकालं सूचयितुं 'लङ् लकारः' भवति । (अनद्यतनम् = ह्यः, परह्यः, प्रपरह्यः, गत-सप्ताहः, गत-मासः, गत-संवत्सरः ... )

उदाहरणानि -

| लट् लकारे एकवचनम् | लङ् लकारे एकवचनम् | लट् लकारे बहुवचनम् | लङ् लकारे बहुवचनम् |
|---|---|---|---|
| पठति | अपठत् | पठन्ति | अपठन् |
| गच्छति | अगच्छत् | गच्छन्ति | अगच्छन् |
| पश्यति | अपश्यत् | पश्यन्ति | अपश्यन् |
| करोति | अकरोत् | कुर्वन्ति | अकुर्वन् |
| वन्दते | अवन्दत | वन्दन्ते | अवन्दन्त |
| डीयते | अडीयत | डीयन्ते | अडीयन्त |
| नमति | अनमत् | नमन्ति | अनमन् |
| वदति | अवदत् | वदन्ति | अवदन् |
| इच्छति | ऐच्छत् | इच्छन्ति | ऐच्छन् |
| ऊहते | औहत | ऊहन्ते | औहन्त |
| अस्ति | आसीत् | सन्ति | आसन् |

**अ) एतानि वाक्यानि उच्चैः पठत । रिक्तस्थानानि पूरयत च ।**

1) बालकः अपठत् । बालकौ अपठताम् । बालकाः अपठन् ।

2) बलिका अपठत् । बालिके अपठताम् । बालिकाः अपठन् ।

3) नदी अवहत् । नद्यौ अवहताम् । नद्यः अवहन् ।

4) भक्तः अनमत् । ___________ अनमताम् । ___________ अनमन् ।

5) मत्स्यः अतरत् । ___________ ___________ । ___________ ___________ ।

6) बालिका अक्रीडत् । ___________ ___________ । ___________ ___________ ।

7) सिंहः अगर्जत् । ___________ ___________ । ___________ ___________ ।

8) वृद्धा अपश्यत् । ___________ ___________ । ___________ ___________ ।

9) सा अलिखत् । ___________ ___________ । ___________ ___________ ।

10) माता अपृच्छत् । मातरौ ___________ । मातरः ___________ ।

11) पिता अनयत् । ___________ ___________ । ___________ ___________ ।

12) हरिः आगच्छत् । ___________ ___________ । ___________ ___________ ।

13) अध्यापकः अवदत् । अध्यापकौ अवदताम् । अध्यापकाः अवदन् ।

14) मित्रम् अगच्छत् । मित्रे अगच्छताम् । मित्राणि अगच्छन् ।

15) अश्वः अधावत् । अश्वौ अधावताम् । अश्वाः अधावन् ।

16) खगः अडीयत । खगौ अडीयेताम् । खगाः अडीयन्त ।

17) सस्यम् अवर्धत । ___________ ___________ । ___________ ___________ ।

18) मुनिः अजपत् । ___________ अजपताम् । ___________ अजपन् ।

19) गुरुः अवदत् । ___________ अवदताम् । ___________ अवदन् ।

**आ) एतानि वाक्यानि उच्चैः पठत ।**

1) बालिका अकरोत् । बालिके अकुरुताम् । बालिकाः अकुर्वन् । (कृ धातुः, परस्मैपदि-रूपाणि)

2) बालिका अकुरुत । बालिके अकुर्वाताम् । बालिकाः अकुर्वत । (कृ धातुः, आत्मनेपदि-रूपाणि)

3) छात्रः अशृणोत् । छात्रौ अशृणुताम् । छात्राः अशृण्वन् ।

4) शिशुः अरोदत् । शिशू अरोदताम् । शिशवः अरोदन् ।

5) भ्राता अक्रीणात् । भ्रातरौ अक्रीणीताम् । भ्रातरः अक्रीणन् ।

6) गायकः अगायत् । गायकौ ___________ । गायकाः ___________ ।

7) महिला अशृणोत् । महिले ___________ । महिलाः ___________ ।

8) बालकः ऐच्छत् । बालकौ ___________ । बालकाः ___________ ।

9) सा औहत । ते __________ । ताः __________ ।

**इ) एतानि वाक्यानि उच्चैः पठित्वा, रिक्तस्थानानि पूरयत ।**

1) त्वम् अपठः । युवाम् अपठतम् । यूयम् अपठत ।

2) त्वम् अगच्छः । युवाम् __________ । यूयम् __________ ।

3) त्वम् अकरोः । युवाम् अकुरुतम् । यूयम् अकुरुत ।

4) त्वम् अशृणोः । __________ अशृणुतम् । __________ __________ ।

**ई) एतानि वाक्यानि उच्चैः पठित्वा, रिक्तस्थानानि पूरयत ।**

1) अहम् अवदम् । आवाम् अवदाव । वयम् अवदाम ।

2) अहम् अनयम् । आवाम् अनयाव । वयम् अनयाम ।

3) अहम् अपठम् । आवाम् __________ । वयम् __________ ।

4) अहम् आनयम् । आवाम् __________ । वयम् __________ ।

5) अहम् अकरवम् । आवाम् अकुर्व । वयम् अकुर्म ।

6) अहम् अवन्दे । आवाम् अवन्दावहि । वयम् अवन्दामहि ।

7) अहम् अमोदे । आवाम् __________ । वयम् __________ ।

**उ) कः उपसर्गः?**

1) उपविशति = उप + विशति; उप इति उपसर्गः ।

2) आगच्छति = आ + गच्छति; आ इति उपसर्गः ।

3) उत्तिष्ठति = उत् + तिष्ठति ; उत् इति उपसर्गः ।

4) प्रविशति = _____ + विशति ; ____ इति उपसर्गः।

5) निर्गच्छति = ______ + __________ ; ____ इति उपसर्गः ।

6) आनयति = ______ + __________ ; ____ इति उपसर्गः ।

| लट् लकारः | लङ् लकारः |
|---|---|
| आगच्छति (आ + गच्छति) | आगच्छत् (आ + अगच्छत् ) |
| उपविशति (उप + विशति) | उपाविशत् (उप + अविशत् ) |
| प्रविशति (प्र + विशति ) | प्राविशत् (प्र + अविशत् ) |
| निर्गच्छति (निर् + गच्छति) | निरगच्छत् (निर् + अगच्छत् ) |
| उत्तिष्ठति (उत् + तिष्ठति) | उदतिष्ठत् (उत् + अतिष्ठत् ) |
| प्राप्नोति (प्र + आप्नोति) | प्राप्नोत् (प्र + आप्नोत् ) |
| स्वीकरोति (स्वी + करोति) | स्व्यकरोत् (स्वी + अकरोत् ) |
| प्रक्षालयति (प्र + क्षालयति) | प्राक्षालयत् (प्र + अक्षालयत् ) |
| प्रवर्तते ( प्र + वर्तते ) | प्रावर्तत ( प्र + अवर्तत ) |

**ऊ) उदाहरणं दृष्ट्वा लङ् लकारे वाक्यानि लिखत**

1) रामः आगच्छति । रामः आगच्छत् ।

2) सीता आगच्छति । सीता ____________ ।

3) बालकः आनयति । बालकः ____________ ।

4) बालिका उपविशति । बालिका ____________ ।

5) सः उत्तिष्ठति । सः____________ ।

6) ते प्रविशन्ति । ते ____________ ।

7) तानि आपतन्ति । तानि ____________ ।

8) एषा प्राप्नोति । एषा ____________।

9) ताः सङ्गच्छन्ते । ताः ____________।

**अस्याः कथायाः क्रियापदानि वर्तमानकाले सन्ति । रक्तवर्णेन लिखितानि क्रियापदानि भूतकाले परिवर्तयत । नूतनां कथां रचयत च ।**

**मम मित्रस्य गोपालस्य गृहे किं किं कुर्वन्ति?**

गोपालः मम गृहस्य समीपे वसति । तस्य भार्या गीता । तयोः द्वौ पुत्रौ स्तः । प्रथमः पुत्रः रामः । द्वितीयः पुत्रः श्यामः । गीता प्रतिदिनं प्रातः पञ्चवादने उत्तिष्ठति । सा स्नानं करोति । अल्पाहारं पचति । गोपालः षड्वादने उत्तिष्ठति । सः पत्रिकां पठति । स्नानं करोति । देवं नमति । रामः श्यामः च सप्तवादने उत्तिष्ठतः । स्नानं कुरुतः । देवं नमतः । रामः वदति "अद्य अहं न खादितुम् इच्छामि । शालां शीघ्रं गच्छामि ।" इति । गीता तं वदति "यदि त्वं प्रतिदिनं प्रातः अल्पाहारं न खादसि तर्हि त्वं न वर्धसे । बालाः खादित्वा दुग्धं पीत्वा एव सम्यक् वर्धन्ते ।" इति । रामः श्यामः च एतत् शृणुतः ।
ततः सर्वे अल्पाहारं खादन्ति । गोपालः कार्यानेन तस्य कार्यालयं गच्छति । गीता च तस्याः कार्यानेन तस्याः कार्यालयं गच्छति । रामः श्यामः च लोकयानं प्रति धावतः, लोकयानेन शालां गच्छतः ।

बालौ त्रिवादने गृहम् आगच्छतः । तौ अङ्गणे कन्दुकेन क्रीडतः । गोपालः पञ्चवादने गृहं आगच्छति । गीता आपणं गत्वा शाकान् क्रीणाति । ततः सा सार्धपञ्चवादने गृहम् आगच्छति । गोपालः गीता रामः श्यामः च सायङ्काले षड्वादनपर्यन्तं अङ्गणे क्रीडन्ति । ततः गीता भोजनं पचति । गोपालः च साहाय्यं करोति । ततः गोपालः बालौ पृच्छति "राम! श्याम ! अद्य युवां शालायां किं पठितवन्तौ ? गृहपाठम् इदानीं कुरुथः वा ?" इति । रामः श्यामः च वदतः "अद्य गणितकक्ष्यायां शिक्षकः नूतनं पाठं शिक्षितवान् । तस्य विषये गृहपाठं शीघ्रमेव कुर्वः" इति । गोपालः वदति "यदि युवां प्रतिदिनं सम्यक् पठथः लिखथः च तर्हि सर्वं सम्यक् जानीथः ।" इति । रामः सार्धनववादने गोपालं वदति "आवाम् इदानीम् अद्यतनं गृहपाठं कृतवन्तौ ।" इति । गोपालः वदति "इदानीं वयं किञ्चित् गायामः, दूरदर्शनं पश्यामः, देवं नमामः, ततः निद्रां कुर्मः" इति । ततः ते किञ्चित् गायन्ति, दूरदर्शनं पश्यन्ति, देवं नमन्ति, निद्रां कुर्वन्ति च ।

**एतं श्लोकं पठत ।**

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।

मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय ॥

<u>पदच्छेदः -</u>

धर्मक्षेत्रे कुरुक्षेत्रे समवेताः युयुत्सवः ।

मामकाः पाण्डवाः च एव किम् अकुर्वत सञ्जय ॥

<u>अन्वयः -</u>

हे सञ्जय, धर्मक्षेत्रे कुरुक्षेत्रे समवेताः युयुत्सवः, मामकाः, पाण्डवाः च एव किम् अकुर्वत ?

<u>केषांचन पदानां अर्थः -</u>

समवेताः = समागताः

युयुत्सवः = योधाः

# 8. संक्षेपरामायणम्

**इदम् अवधेयम्**

भूतकालार्थं बोधयितुं केचन प्रकाराः भवन्ति । ते लङ् लकारः (दशमः पाठः), स्म, भूतकृदन्तः इत्यादयः च ।

*उदाहरणानि*

लङ् लकारे – (अ) बालकः अपठत् । (आ) बालिका अपठत् । (इ) शिष्याः अवदन् ।

स्म – (अ) वालकः पठति स्म । (आ) बालिका पठति स्म । (इ) शिष्याः वदन्ति स्म ।

(यद्यपि क्रियापदं लट् लकारे भवति, स्म योगे लङ् लकारस्य अर्थः बोधितः भवति ।)

भूतकृदन्तः – (अ) बालकः पठितवान् । (आ) बालिका पठितवती । (इ) शिष्याः उक्तवन्तः ।

भूतकृदन्ताः तिङन्ताः (क्रियापदानि) न इति स्मर्तव्यम् । ते सुबन्ताः एव ।

**एतां कथाम् उच्चैः पठत ।**

महर्षिः वाल्मीकिः तमसानद्याः तीरे वसति स्म । एकदा देवर्षिः नारदः तस्य आश्रमम् आगतवान् । वाल्मीकिः नारदं प्रणम्य उक्तवान्, "अस्ति मम जिज्ञासा । लोके कः श्रेष्ठपुरुषः ?" इति ।

नारदः वाल्मीकिं प्रत्युक्तवान् । "अयोध्यायां दशरथः इति महाराजः अस्ति । तस्य तिस्रः भार्याः सन्ति । तासु ज्येष्ठा कौसल्या । तस्याः पुत्रः रामः । दशरथस्य द्वितीया भार्या सुमित्रा । तस्याः लक्ष्मणः शत्रुघ्नः च इति द्वौ पुत्रौ स्तः । कनिष्ठा भार्या कैकेयी । तस्याः पुत्रः भरतः । एवं दशरथस्य चत्वारः पुत्राः सन्ति ।“

एवं नारदः रामस्य कथां वक्तुम् आरब्धवान् । दशरथः रामं युवराजं कर्तुम् इष्टवान् । परन्तु कैकेयी तस्याः पुत्रं भरतम् एव युवराजं कर्तुम् इष्टवती । सा दशरथं स्मारितवती च यत्, “भवान् पुरा द्वौ वरौ दत्तवान् । तौ इदानीं पृच्छामि । मम प्रथमः वरः रामस्य चतुर्दशवर्षाणां वनवासः भवतु इति । द्वितीयः वरः भरतः युवराजः भवतु इति ।“

एतत् श्रुत्वा दशरथः दुःखितः अभवत् । तथापि सः वचनबद्धः आसीत् । अतः, यथा कैकेयी पृष्ट्वती तथा एव भवतु इति दशरथः अङ्गीकृतवान् । रामः पितृवाक्य-परिपालपानार्थं वनं गतवान् । तेन सह पत्नी सीता, भ्राता लक्ष्मणः च गतवन्तौ । दशरथः शोकं सोढुम् असमर्थः अभवत् । सः मृतः च ।

भरतः राज्यं कर्तुं न इच्छति स्म । सः वनं गत्वा रामस्य पुनरागमनं प्रार्थितवान् । किन्तु सत्यवाक्यः रामः निराकृत्य वने एव स्थितवान् । एवं ते त्रयः त्रयोदश वर्षाणि वने उषितवन्तः ।

तदा रावणः कपटेन सीताम् अपहृतवान् । तां लङ्कां नीतवान् । रामः लक्ष्मणः च सीतायाः अन्वेषणार्थम् आञ्जनेयस्य साहाय्येन सुग्रीवम् उपगतवन्तौ । रामः सुग्रीयस्य भ्रातरं हत्वा तेन मैत्रीं कृतवान् । आञ्जनेयः समुद्रम् उल्लङ्घ्य लङ्कां प्राप्तवान् । तत्र अशोकवने सीतां दृष्टवान् । तस्याः सान्त्वनं च कृतवान् ।

सः लङ्कां दग्ध्वा पुनः रामं प्राप्तवान् । तं सर्वं वृत्तान्तं कथितवान् च । लङ्कां गन्तुम् उद्युक्तः च अभवत् । वानराणां साहाय्येन समुद्रे सेतुं निर्मापितवान् । लङ्कायां लक्ष्मणः कुम्भकर्णं मारितवान्, रामः रावणं च । रामः विभीषणः लङ्काराजः इति नियुङ्क्तवान् । सः सीतां प्राप्य अयोध्यां निवर्तितवान् ।

जनाः आनन्देन रामस्य पट्टाभिषेकम् आचरितवन्तः । रामः धर्मेण राज्यभारम् ऊढवान् ।

एषः रामः गुणवान्, वीर्यवान्, धर्मज्ञः, कृतज्ञः, सत्यवाक्यः, दृढव्रतः च आसीत् । एतां कथां श्रुत्वा वाल्मीकिः सन्तुष्टः अभवत् ।

**अभ्यासः**

**कथा श्रावणम् – अधः कथानां संक्षेपः दत्तः । तम् उपयुज्य कथां वदत ।**

१. दशरथस्य पुत्र प्राप्तिः

   दशरथः अपुत्रः आसीत् – पुत्रकामेष्टि-यागः – पायसं पत्नीभ्यः दत्तवान् – कौसल्यायाः रामः, कैकेय्याः भरतः, सुमित्रायाः यमलौ लक्ष्मणशत्रुघ्नौ च इति चत्वारः पुत्राः जाताः ।

२. रामस्य वनगमनम्

   दशरथस्य इच्छा – कैकेय्याः इच्छा – वरं पृष्टवती – वनवासः

३. शबर्या मेलनम्

वनवासः – शबरी – रामस्य सेवा

४. सीतायाः अपहरणम्

वनवासः – रावणः सीताम् अपहर्तुम् इष्टवान्  - मारीचस्य साहाय्यं प्राप्तवान्  – सुवर्णमृगः – लक्ष्मणरेखा – अपहरणम्

५. कुम्भकर्णस्य वधः

कुम्भकर्णस्य निद्रा – उत्थापितः – लक्ष्मणेन युद्धः – मरणम्

६. रामस्य पट्टाभिषेकः

लङ्कायां विजयः – अयोध्यागमनम् – सीतायाः अग्निपरीक्षा – पट्टाभिषेकः

# 9. सुभाषितानि

**एतानि सुभाषितानि पठत, कण्ठस्थीकुरुत च ।**

संसारविषवृक्षस्य द्वे फले अमृतोपमे ।
सुभाषितरसास्वादः संगतिः सुजनैः सह ॥ १ ॥

जननी जन्मभूमिश्च जाह्नवी च जनार्दनः ।
जनकः पञ्चमश्चैव जकाराः पञ्च दुर्लभाः ॥ २ ॥

क्षणशः कणशश्चैव विद्यामर्थं च साधयेत् ।
क्षणत्यागे कुतो विद्या कणत्यागे कुतो धनम् ॥ ३ ॥

विद्या ददाति विनयं विनयाद्याति पात्रताम् ।
पात्रत्वात् धनमाप्नोति धनाद्धर्मः ततः सुखम् ॥ ४ ॥

कस्तूरी जायते कस्मात् को हन्ति करिणां शतम् ।
किं कुर्यात् कातरो युद्धे मृगात् सिंहः पलायते ॥ ५ ॥

**कठिनपदानाम् अर्थः**

पात्रता, पात्रत्वम् = कीर्तिः, गौरवम्

आप्नोति = प्राप्नोति, लभते

करिणाम् = गजानाम्  (करी = गजः)

कातरः = भीरुः, धैर्यहीनः

**सुभाषितानां पदच्छेदः, अर्थः च ।**

संसारविषवृक्षस्य द्वे फले अमृतोपमे ।

सुभाषितरसास्वादः संगतिः सुजनैः सह ॥ १ ॥

(संसारः कश्चन विषेण युक्तः वृक्षः भवति । किन्तु तस्य द्वे फले अमृतम् इव स्तः । ते सुभाषितानाम् अनुभवः, सज्जनानां सङ्गः च । )

जननी जन्मभूमिः च जाह्नवी च जनार्दनः ।

जनकः पञ्चमः च एव जकाराः पञ्च दुर्लभाः ॥ २ ॥

(जननी, जन्मभूमिः, जाह्नवी (गङ्गा), जनार्दनः (विष्णुः), जनकः इति एते पञ्च जकाराः कष्टेन सिद्धाः । )

क्षणशः कणशः च एव विद्याम् अर्थं च साधयेत् ।

क्षणत्यागे कुतः विद्या कणत्यागे कुतः धनम् ॥ ३ ॥

(एकैकं क्षणम् अपि उपयुज्य विद्यार्जनं करणीयम् । समयस्य व्ययः न करणीयः । तथा हि एकैकेन कणेन धनं साधनीयम् । यतः – क्षणं नष्टं चेत्, विद्या न सिद्ध्यति । कणं नष्टं चेत्, धनं न वर्धते । )

विद्या ददाति विनयं विनयात् याति पात्रताम् ।

पात्रत्वात् धनम् आप्नोति धनात् धर्मः ततः सुखम् ॥ ४ ॥

(विद्या विनयं ददाति । विनयेन कार्यं यः करोति सः कीर्तिं प्राप्नोति । तेन धनं प्राप्नोति च । धनं सङ्गृह्य धर्मम् आचरति । ततः सुखं च प्राप्नोति । )।

कस्तूरी जायते कस्मात् कः हन्ति करिणां शतम् ।

किं कुर्यात् कातरः युद्धे मृगात् सिंहः पलायते ॥ ५ ॥

(सुभाषितेषु 'समस्यापूर्तिः' इति बहुधा भवन्ति । अस्य सुभाषितस्य अन्ते "सिंहः मृगात् पलायते" इति उक्तम् । अहो! कथं तत् ? मृगाः सिंहात् धावन्ति । परन्तु अत्र विपरीतरीत्या उक्तम् ?! कविः एवं समस्यापूर्तिं करोति – कस्तूरी कस्मात् जायते ? कस्तूत्री मृगात् जायते ।

करिणां शतं (शतं गजान्) कः हन्ति ? सिंहः करिणां शतं हन्ति ।

कातरः युद्धे किं कुर्यात् ? कातरः युद्धे पलायते (धावति) ! )

अभ्यासः

**अ) पर्यायपदानि लिखत**

**उदा. – जलम् = तोयम्, सलिलम्, अम्बु, वारि**

1) वृक्षः =
2) सुजनः =
3) जननी =
4) जाह्नवी =
5) जनकः =

**आ) विरुद्धार्थकपदानि लिखत**

उदा – उन्नतः x वामनः

1) भीरुः x
2) अमृतम् x
3) जन्म x
4) सुखम् x
5) धनिकः x
6) सज्जनः x
7) विनयः x

# 10. श्वः भविष्यति! (लृट् लकारः)

लृट् लकारे क्रियापदानि भविष्यत्-कालं सूचयति । अधः कानिचन लृट् लकाररूपाणि दत्तानि । तानि उच्चैः पठत ।

| धातुः | लट् लकारे | लृट् लकारे |
|---|---|---|
| पठ् | पठति | पठिष्यति |
| गम् | गच्छति | गमिष्यति |
| दृश् | पश्यति | द्रक्ष्यति |
| प्र + आप् | प्राप्नोति | प्राप्स्यति |
| पा | पिबति | पास्यति |
| कृ (परस्मैपदी-रूपम्) | करोति | करिष्यति |
| वन्द् | वन्दते | वन्दिष्यते |
| डी | डयते | डयिष्यते |
| मुद् | मोदते | मोदिष्यते |
| वद् | वदति | वदिष्यति |
| इष् | इच्छति | एषिष्यति |
| भू | भवति | भविष्यति |
| अस् | अस्ति | भविष्यति* |

*लृट् लकारे अस् धातुः भू-धातुरूपाणि प्राप्नोति ।

**अ) एतानि वाक्यानि उच्चैः पठत, रिक्तस्थानानि पूरयत च ।**

1) बालकः पठिष्यति । बालकौ पठिष्यतः । बालकाः पठिष्यन्ति ।

2) बलिका पठिष्यति । बालिके पठिष्यतः । बालिकाः पठिष्यन्ति ।

3) सः वदिष्यति । ____________ ____________ । ____________ ____________ ।

4) सा गमिष्यति । ____________ ____________ । ____________ ____________ ।

5) चषकः वर्तते । चषकौ ____________ । चषकाः ____________ ।

6) नर्तकी नर्तिष्यति । नर्तक्यौ ____________ । ____________ ____________ ।

7) लता वर्धिष्यते । ____________ ____________ । ____________ ____________ ।

8) वाहनं चलिष्यति । ____________ ____________ । ____________ ____________ ।

9) अतिथिः उपवेक्ष्यति । अतिथी ___________ । ___________ ___________ ।

10)कपिः कूर्दिष्यते ।___________ ___________ । ___________ ___________ ।

11)शिशुः क्रीडिष्यति । ___________ ___________ । ___________ ___________ ।

12)तर्जनी सूचयिष्यति । ___________ ___________ । ___________ ___________ ।

13)चोरः चोरयिष्यति । चोरौ ___________ । ___________ ___________ ।

**आ) एतानि वाक्यानि उच्चैः पठित्वा, रिक्तस्थानानि पूरयत ।**

1) त्वं पठिष्यसि । युवां पठिष्यथः । यूयं पठिष्यथ ।

2) त्वं करिष्यसि । युवां ___________ । यूयं ___________ ।

3) त्वं मोदिष्यसे । युवां ___________ । ___________ ___________ ।

4) त्वम् एषिष्यसि । ___________ ___________ । ___________ ___________ ।

5) त्वं प्राप्स्यसि । युवां ___________ । ___________ ___________ ।

**इ) एतानि वाक्यानि उच्चैः पठित्वा, रिक्तस्थानानि पूरयत ।**

1) अहं वदिष्यामि । आवां वदिष्यावः । वयं वदिष्यामः ।

2) अहं करिष्यामि । आवां ___________ । ___________ __________ ।

3) अहं गमिष्यामि । ___________ ___________ । ___________ ___________ ।

4) अहं लप्स्ये । आवां लप्स्यावः । ___________ ___________ ।

5) अहं पास्यामि । ___________ ___________ । ___________ ___________ ।

**पति-पत्न्योः दूरवाणी-संभाषणं पठत ।**

श्रीधरः कार्यालयतः गृहं प्रति गच्छति । यदा सः मार्गे आसीत् तदा पत्नी दूरवाण्या सम्पर्कं कृतवती ।

श्रीधरः – नीरजे, अपि कुशलिनी ?

नीरजा – आम्, आर्य । भवतः मित्रस्य स्वरूपस्य दूरवाणी आसीत् ।

श्रीधरः – किम् उक्तवान् सः ?

नीरजा – यदा दीर्घविरामः **भविष्यति** तदा विहारार्थं कुत्रापि भवन्तौ **गमिष्यतः** वा ? इति सः पृष्टवान् । एतावत् पर्यन्तं न निश्चितम् इति उक्तवती । तस्य मातापितरौ अपि भारतदेशात् आगमिष्यतः इति ज्ञातवती ।

श्रीधरः – तर्हि तान् आह्वयामः । भवती कुत्र **गमिष्यामः** इति सूचयतु ।

नीरजा – अत्र तु रमणीयाः सरोवराः, पर्वताः, राष्ट्रियवनानि च सन्ति । तेषां समयसौकर्यं ज्ञात्वा निर्णयं **करिष्यामि** ।

श्रीधरः – साधु ।

नीरजा – अन्यत् च … मार्गे भवान् आपणतः क्षीरं क्रीत्वा **आनेष्यति** किम् ?

श्रीधरः – अस्तु । तथैव **करिष्यामि** ।

नीरजा – बाढम् । अहं भोजनं सिद्धं कृतवती । भवतः प्रतीक्षां **करिष्यामि** ।

# 11. कुम्भमेला (तृतीयाविभक्तिः)

**इदम् अवधेयम् -** क्रियायां यत् साधनं भवति, तस्य तृतीया-विभक्तिः भवति ।

**अ) एतानि वाक्यानि उच्चैः पठत । रिक्तस्थानानि पूरयत च ।**

1) सः पादाभ्यां चलति ।

2) अहं नासिकया जिघ्रामि ।

3) वाहनम् इन्धनेन क्रमते ।

4) सा __________ ददाति । [ हस्तौ ]

5) बालकः लेखन्या लिखति ।

6) हस्तिपकः गजं __________ अवरुद्धवान् । [ अङ्कुशम् ]

7) सः __________ तालम् उद्घाटयति । [ कुञ्चिका ]

8) व्याघ्रः __________ छिनत्ति । [ नखाः ]

**इदम् अवधेयम् -** भावसूचकानां शब्दानां तृतीयाविभक्तिः भवति ।

**आ) एतानि वाक्यानि उच्चैः पठत । रिक्तस्थानानि पूरयत च ।**

1) बालिका श्रद्धया पाठं पठति ।

2) माता प्रीत्या पुत्रम् आह्वयति ।

3) योद्धा कोपेन शस्त्रं क्षिपति ।

4) साधुः __________ वदति । [ दया ]

| |
|---|
| **इदम् अवधेयम् –** सह, विना, अलं योगे तृतीयाविभक्तिः भवति । |

**इ) एतानि वाक्यानि पठत । रिक्तस्थानानि पूरयत च ।**

सीता रामेण सह वनम् अगच्छत् ।

सः पत्न्या सह वाहनम् आरूढवान् ।

1) अध्यापकः __________ सह मृगालयं गतवान् । [ छात्राः ]

2) ते अतिथिना सह भ्रमन्ति ।

3) ते अतिथिभिः सह खादन्ति ।

4) अनुमोदकाः क्रीडापटुभिः सह तुष्यन्ति ।

5) शिशुः मात्रा विना न निद्राति ।

6) बालकः __________ सह नगरं गतवान् । [ पिता ]

7) बालकाः पितृभिः सह क्रीडन्ति ।

8) भवान् __________ भवतु ! [ सन्तोषः ]

9) __________ कार्यं न कर्तव्यम् । [ त्वरा ]

10) अलं __________ । [ विस्तरः ]

11) अलं __________ । [क्रीडा ]

| |
|---|
| **इदम् अवधेयम्** - यः शब्दः कारणवाचकः (हेतुवाचकः) भवति, तस्य अपि तृतीयाविभक्तिः भवति । |

**ई) एतानि वाक्यानि पठत । रिक्तस्थानानि पूरयत च ।**

1) रामस्य गमनेन दशरथः दुःखितः अभवत् ।

2) बालकः शिरोवेदनया शालां न गतवान् ।

3) सा __________ श्रान्ता अभवत् । [ प्रयाणम् ]

4) पतङ्गः __________ दग्धः । [ अग्निस्पर्शः ]

**एतं पाठम् उच्चैः पठत ।**

पुरा देवाः नष्टशक्तयः आसन् । देवानाम् अपेक्षया असुराणाम् एव अधिकशक्तिः आसीत् । अतः देवाः पुनः शक्तिं प्राप्तुम् अमृतम् इष्टवन्तः । अमृतं समुद्रे आसीत् । तत् प्राप्तुं ते असुरैः सह मैत्रीं कृतवन्तः । देवाः असुरैः मिलित्वा समुद्रमथनम्  कृतवन्तः । अमृतेन पूर्णः घटः उद्भूतः । तदा देवानाम् असुराणां च कलहः जातः । "एतत् अस्माकम् अमृतम्" इति देवाः उक्तवन्तः । "न, एतत् अस्माकम्" इति असुराः ।

तदा विष्णुः गरुडे उपविश्य, घटं गृहीत्वा डीनवान् । मार्गे घटात् अमृतबिन्दवः चतुर्षु क्षेत्रेषु अपतन् ।  तानि क्षेत्राणि प्रयागः, हरिद्वारः, उज्जयिनी, नासिकक्षेत्रं च ।

अद्य अपि प्रतिद्वादशवर्षं एकैकस्मिन् क्षेत्रे पूर्णकुम्भमेला इति उत्सवम् आचरन्ति । अनेके जनाः समागच्छन्ति । केचन बस्-यानेन, केचन विमानेन, अपरे रैल्-शकटेन, अन्ये कार्-वाहनेन, इतरे पादाभ्याम् आगच्छन्ति ।

ते भक्त्या नद्यां स्नान्ति; श्रद्धया देवान्  नमन्ति च ।  जनाः बान्धवैः सह; शिष्याः गुरुभिः सह; बालकाः पितृभिः सह; साधवः साधुभिः सह , एवं सर्वे अपि आनन्देन उत्सवम् आचरन्ति । एतेन उत्सवेन पापनाशः भवति इति जनाः विश्वसन्ति ।

द्वादश-पूर्णकुम्भ-मेलानन्तरं प्रयागे महाकुम्भमेला भवति । २००१ तमे संवत्सरे महाकुम्भमेला आसीत् । कोटिशः जनाः उत्साहेन भागम् अवहन् । ये मेलां गच्छन्ति ते "अविस्मरणीयः", "अद्भुतम्" इति विवृण्वन्ति ।

अग्रिम-महाकुम्भमेला २१४५ तमे वर्षे भविष्यति !

**उ)   उत्तराणि लिखत**

1) अमृतं कुत्र आसीत् ?
2) देवाः कथं अमृतं प्राप्तवन्तः ?
3) अमृतबिन्दवः कुत्र अपतन् ?
4) शिष्याः कैः सह कुम्भमेलां गच्छन्ति ?

5) जनाः कथं कुम्भमेलां प्राप्नुवन्ति ?

ऊ) रिक्त-स्थानानि पूरयत

1) छात्राः __________ सह वदन्ति । [गुरवः]

2) योद्धारः __________ युद्धं कुर्वन्ति । [शत्रवः]

3) सः __________ सह संवादं करोति । [वाक्पटुः]

4) रोहिणी __________ सह भासते । [इन्दुः]

5) सः __________ ददाति । [श्रद्धा]

6) यतः सः __________ सह आगतवान्, __________ सह एव गच्छति । [ बान्धवाः , ते ]

**ऋ) रिक्त-स्थानानि पूरयत**

1) अहं __________ शृणोमि ।[कर्णौ]

2) अहं __________ वदामि । [मुखम्]

3) अहं __________ लिखामि । [हस्तः]

4) अहं __________ लिखामि । [लेखनी]

5) अहं __________ भारं नयामि । [हस्तौ]

6) अहं __________ पश्यामि । [नेत्रे]

7) अहं __________ दर्शयामि । [तर्जनी]

8) अहं __________ चिह्नं करोमि । [अन्गुष्ठः]

9) आवां __________ वदावः । [दूरभाषा]

10)वयं __________ गच्छामः । [रैल्-यानम्]

**ऋ) रिक्त-स्थानानि पूरयत**

1) सः __________ घटं पूरयति । [जलं]

2) भवान् __________ सह आगतवान् ? [ कः ]

3) ते __________देवान् पूजयन्ति । [भक्तिः]

4) अलं __________ । [ कलहः ]

5) बालाः __________ नद्यां तरन्ति । [सन्तोषः]

6) वानरः __________ विना वृक्षात् वृक्षं कूर्दते । [आयासः]

7) सः __________ दृष्टवान् । [ कुतूहलम् ]

8) 'सा __________ कार्यं करोति' इति सर्वे प्रशंसन्ति । [ क्षमा ]

9) अलं __________ । [ रोदनम् ]

**अधः तृतीयाविभक्ति-रूपाणि दत्तानि । कोष्टकं परिशीलयत**

| प्रातिपदिकम् | प्रथमाविभक्तिः, एकवचनम् | तृतीयाविभक्तिः, एकवचनम् | तृतीयाविभक्तिः, द्विवचनम् | तृतीयाविभक्तिः,, बहुवचनम् |
|---|---|---|---|---|
| हस्त (अकारान्तः पुंलिङ्गशब्दः) | हस्तः | हस्तेन | हस्ताभ्याम् | हस्तैः |
| पत्र (अकारान्तः नपुंलिङ्गशब्दः) | पत्रम् | पत्रेण | पत्राभ्याम् | पत्रैः |
| श्रद्धा (आ. स्त्री.) | श्रद्धा | श्रद्धया | श्रद्धाभ्याम् | श्रद्धाभिः |
| हरि (इ. पुं.) | हरिः | हरिणा | हरिभ्याम् | हरिभिः |
| शिशु (उ. पुं.) | शशुः | शिशुना | शिशुभ्याम् | शिशुभिः |
| मति (इ. स्त्री.) | मतिः | मत्या | मतिब्याम् | मतिभिः |
| धेनु (उ. स्त्री.) | धेनुः | धेन्वा | धेनुभ्याम् | धेनुभिः |

| | | | | |
|---|---|---|---|---|
| पितृ (ऋ. पुं.) | पिता | पित्रा | पितृभ्याम् | पितृभिः |
| तद् ; किम् (पुं.) | सः - कः | तेन - केन | ताभ्याम् - काभ्याम् | तैः - कैः |
| तद् ; किम् (स्त्री.) | सा - का | तया - कया | ताभ्याम् - काभ्याम् | ताभिः - काभिः |
| तद् ; किम् (न.) | तत् - किम् | तेन - केन | ताभ्याम् - काभ्याम् | तैः - कैः |
| युष्मद् (दकारान्तः उभयलिङ्गशब्दः) | त्वम् | त्वया | युवाभ्याम् | युष्माभिः |
| अस्मद् (दकारान्तः उभयलिङ्गशब्दः) | अहम् | मया | आवाभ्याम् | अस्माभिः |

अ) एतेषां तृतीया-विभक्ति-रूपाणि त्रिषु वचनेषु वदत, लिखत च

1) पुस्तकम् (अ. नपुं.) - पुस्तकेन पुस्तकाभ्याम् पुस्तकैः
2) लेखनी (ई. स्त्री.) -
3) चषकः (अ. पुं.) -
4) नदी (ई. स्त्री.) -
5) स्वसा (ऋ. स्त्री.) -
6) दूरभाषा (आ. स्त्री.) -
7) हस्तः (अ. पुं.) -
8) अङ्कनी (ई. स्त्री.) -
9) शत्रुः (उ. पुं.) -
10) बुद्धिः (इ. स्त्री.) -
11) प्रकृतिः (इ. स्त्री.) -
12) सन्धिः (इ. पुं.) -

# 12. पारितोषकम् (चतुर्थीविभक्तिः)

**इदम् अवधेयम्** - यत्र दानक्रिया अस्ति तत्र, यस्मै किमपि दद्मः तस्य (पदस्य) चतुर्थीविभक्तिः भवति ।

**एतानि वाक्यानि उच्चैः पठत ।**

पार्वती गणेशाय फलं ददाति ।

जननी सेविकायै धनं ददाति ।

अग्रजः भगिन्यै पुस्तकं ददाति ।

नृपः कवये सुवर्णकङ्कणं दत्तवान् ।

पुत्रः पित्रे वस्त्रं यच्छति ।

गोपः धेनुभ्यां आहारं यच्छति ।

धनिकः भिक्षुकेभ्यः नाणकानि ददाति ।

बालकः मित्राय मधुरं दत्तवान्।

अध्यक्षः कस्मै पारितोषिकं ददाति ?

जनकः भवद्भ्यां लेखनीः दत्तवान् वा ?

**उदाहरणानुगुणं वाक्यानि रचयन्तु ।**

(जनकः --> पुत्रः --> अग्रजा --> भगिनी --> माता --> पितामहः --> मित्रम् ।)

1) जनकः पुत्राय प्रसादं दत्तवान् ।
2) पुत्रः __________ प्रसादं दत्तवान् ।
3) अग्रजा __________ प्रसादं दत्तवती ।
4) भगिनी __________ __________ ।
5) माता __________ __________ ।
6) पितामहः __________ __________ ।

7) मित्रं जनकाय प्रसादं दत्तवान् ।

**चतुर्थीविभक्तिरूपाणि ।**

| प्रातिपदिकम् | प्रथमाविभक्तिः, एकवचनम् | चतुर्थीविभक्तिः, एकवचनम् | चतुर्थीविभक्तिः, द्विवचनम् | चतुर्थीविभक्तिः,, बहुवचनम् |
|---|---|---|---|---|
| सेवक (अकारान्तः पुंलिङ्गशब्दः) | सेवकः | सेवकाय | सेवकाभ्याम् | सेवकेभ्यः |
| लता (आ. स्त्री.) | लता | लतायै | लताभ्याम् | लताभ्यः |
| मित्र (अ. नपुं.) | मित्रम् | मित्राय | मित्राभ्याम् | मित्रेभ्यः |
| अतिथि (इ. पुं.) | अतिथिः | अतिथये | अतिथिभ्याम् | अतिथिभ्यः |
| गुरु (उ. पुं.) | गुरुः | गुरवे | गुरुभ्याम् | गुरुभ्यः |
| पितृ (ऋ. पुं.) | पिता | पित्रे | पितृभ्याम् | पितृभ्यः |
| मातृ (ऋ. स्त्री.) | माता | मात्रे | मातृभ्याम् | मातृभ्यः |
| भगिनी (ई. स्त्री.) | भगिनी | भगिन्यै | भगिनीभ्याम् | भगिनीभ्यः |
| मूर्तिः (इ. स्त्री.) | मूर्तिः | मूर्त्यै/मूर्तये | मूर्तिभ्याम् | मूर्तिभ्यः |
| धेनु (उ. स्त्री.) | धेनुः | धेन्वै/धेनवे | धेनुभ्याम् | धेनुभ्यः |
| तद् (द. पुं.) | सः | तस्मै | ताभ्याम् | तेभ्यः |
| तद् (द. स्त्री.) | सा | तस्यै | ताभ्याम् | ताभ्यः |
| तद् (द. नपुं.) | तत् | तस्मै | ताभ्याम् | तेभ्यः |
| किम् ( पुं.) | कः | कस्मै | काभ्याम् | केभ्यः |
| युष्मद् (द. उभय.) | त्वम् | तुभ्यम् / ते | युवाभ्याम् / वाम् | युष्मभ्यम् / वः |
| अस्मद् (द. उभय.) | अहम् | मह्यम् / मे | आवाभ्याम् / नौ | अस्मभ्यम् / नः |
| भवत् (त. पुं.) | भवान् | भवते | भवद्भ्याम् | भवद्भ्यः |
| भवत् (त. स्त्री.) | भवती | भवत्यै | भवतीभ्याम् | भवतीभ्यः |
| सर्व (अ. पुं.) | सर्वः | सर्वस्मै | सर्वाभ्याम् | सर्वेभ्यः |
| सर्व (आ. स्त्री.) | सर्वा | सर्वस्यै | सर्वाभ्याम् | सर्वाभ्यः |
| सर्व (अ. नपुं.) | सर्वम् | सर्वस्मै | सर्वाभ्याम् | सर्वेभ्यः |

**अभ्यासाः**

**अ) आवरणे विद्यमानस्य शब्दस्य चतुर्थीविभक्तिरूपेण रिक्तस्थानानि पूरयत ।**

उदा. - जननी "पुत्राभ्यां" (पुत्रौ) खाद्यं ददाति ।

1) अध्यक्षः ___________ (कवी) पुरस्कारं ददाति ।
2) अनुजा ___________ (बन्धुः) मधुरं यच्छति ।
3) मन्त्री ___________ (गायकाः) उपायनानि ददाति ।
4) गृहिणी ___________ (सेविके) धनं ददाति ।
5) भवान् ___________ (कार्यकर्तारः) किं कार्यं ददाति ?
6) कृषकः ___________ (धेनुः) तृणं यच्छति ।
7) पुत्रः ___________ (माता) फलानि ददाति ।
8) अहं ___________ (भ्रातरौ) युतकानि ददामि ।

**आ) आवरणे विद्यमानस्य सर्वनामशब्दस्य चतुर्थीविभक्तिरूपेण रिक्तस्थानानि पूरयत ।**

उदा -- बालकाः आगच्छन्ति । "तेभ्यः" (ते) चाकलेहं ददातु \

1) बालिकाः जयं प्राप्तवत्यः । अध्यक्षः --------(ताः) पारितोषिकं दत्तवान् ।
2) कार्यकर्तारौ श्रान्तौ स्तः । -----(तौ) फलरसं यच्छामः ।
3) सेविका सम्यक् कार्यं करोति । -----(सा) अधिकं वेतनं ददातु ।
4) एका एव लेखनी अस्ति । ------------(का) ददानि?
5) एतत् नूतनं पुस्तकमस्ति । तत् ----------(भवान्) दास्यामि ।
6) भवतः विभक्तिवल्लरी-पुस्तकं -----(अहम्) ददाति वा?
7) अत्र अनेकानि पुस्तकानि सन्ति । तानि ----(काः) दद्मः?

| |
|---|
| **इदम् अवधेयम् - तादर्थ्ये** चतुर्थीप्रयोगः भवति । ("किमर्थम्" इति प्रश्नस्य उत्तररूपे अपि चतुर्थीप्रयोगः भवति ।) |

**एतानि वाक्यानि पठत ।**

जनकः **पुत्राय** (पुत्रः) पुस्तकम् आनयति ।

जनकः **पुत्रीभ्यः** (पुत्र्यः) वस्त्राणि क्रीणाति ।

अग्रजः **अतिथिभ्यः** (अतिथयः) फलानि आनयति ।

सेवकः **भवते** (भवान्) आसन्दम् आनयति ।

अहं **तुभ्यं** (त्वम्) पत्रिकाम् आनयामि ।

युवकः **मित्रेभ्यः** (मित्राणि) वार्तापत्रिकाः आनयति ।

कविः किमर्थं काव्यं लिखति ? कविः **कीर्त्यै** काव्यं लिखति ।

वृक्षाः किमर्थं फलन्ति ? वृक्षाः **परोपकाराय** फलन्ति ।

**इ) रिक्तस्थानानि पूरयत ।**

1) केशवः <u>मित्राय</u> (मित्रम्) सङ्गणकम् आनयति ।

2) केशवः ___________ (भगिन्यः) पुष्पाणि क्रीणाति ।

3) केशवः ___________ (माता) फलरसम् आनयति ।

4) केशवः ___________ (वयम्) लेखनीः क्रीणाति ।

5) केशवः ___________ (सर्वे) आसनानि आनयति ।

6) केशवः ___________ (के) घटीः क्रीणाति ?

7) केशवः ___________ (नौकाविहारः) जलाशयं गच्छन्ति ।

8) केशवः ___________ (देवदर्शनम्) देवालयं गच्छति ।

**इदम् अवधेयम्** - "नमः / स्वस्ति" योगे चतुर्थी--- "नमः"/"स्वस्ति" इति शब्दयोः योगः यत्र अस्ति, तस्य शब्दस्य चतुर्थीविभक्तिः ।

कृष्णाय नमः। शिवाय नमः । देव्यै नमः। गुरुभ्यः नमः । जनेभ्यः स्वस्ति ।

**ई) रिक्तस्थानानि पूरयत ।**

(हरिः) <u>हरये</u> नमः ।

1) (सर्वे) ___________ ।

2) (गुरुः) ___________ ।

3) (भवान्) ____________ ।

4) (आदित्यः) ____________ ।

5) (धेनुः) ____________ ।

6) (सरस्वती) ____________ ।

7) (त्वम्) ____________ ।

8) (पिता) ____________ ।

9) (पार्वती) ____________ ।

| |
|---|
| **इदम् अवधेयम्** - "रोचते" इत्यस्य शब्दस्य प्रयोगे, यस्मै रोचते तस्य चतुर्थीविभक्तिः भवति । यत् रोचते तस्य तु प्रथमाविभक्तिः एव । |

१. बालकाय क्रीडा रोचते । २. गीतायै पुष्पं रोचते । ३. युवकेभ्यः चलच्चित्रं रोचते ।

उ) उदाहरणानुगुणं वाक्यानि लिखन्तु ।

उदा --- [ गजः ----- इक्षुदण्डः] -- गजाय इक्षुदण्डः रोचते ।

1) [ भगिनी --- चित्रम्] - ______________ ______________ रोचते ।

2) [ माला ---- सङ्गीतम् ] - ______________ ______________ रोचते ।

3) [ पिता -----पुस्तकम् ] - ______________ ______________ रोचते ।

4) [ मुनिः ---- आश्रमः ] - ______________ ______________ रोचते ।

5) [ अहम् -----मधुरम् ] - ______________ ______________ रोचते ।

6) [ त्वम् -----फलम् ] - ______________ ______________ रोचते ।

7) [ वयम् ---- संस्कृतम् ] - ______________ ______________ रोचते ।

8) [जन्तवः ---- आहारम् ] - ______________ ______________ रोचते ।

| |
|---|
| **इदम् अवधेयम्** - " क्रुध्यति (कुप्यति), असूयति, ईर्ष्यति, द्रुह्यति " इत्येतेषां प्रयोगः यत्र क्रियते तत्र क्रोधादीनां पात्रस्य चतुर्थीविभक्तिः भवति । |

उदा--- रावणः रामाय क्रुध्यति / द्रुह्यति / ईर्ष्यति / असूयति ।

ऊ) रिक्तस्थानानि पूरयत

कंसः <u>कृष्णाय</u> क्रुध्यति । [कृष्णः]

1) पूतना _____________ द्रुह्यति । [कृष्णः]
2) भिक्षुकः _____________ असूयति । [धनिकाः]
3) दुर्जनः _____________ क्रुध्यति । [सज्जनाः]
4) कौरवाः _____________ ईर्ष्यन्ति । [पाण्डवाः]
5) महिषासुरः _____________ द्रुह्यति । [दुर्गा]
6) नकुलः _____________ असूयति । [सर्पाः]
7) निर्धनाः _____________ ईर्ष्यन्ति । [धनिकाः]
8) रावणः _____________ क्रुध्यति । [रामः]
9) राक्षसाः _____________ ईर्ष्यन्ति । [देवाः]
10) ताटका _____________ द्रुह्यति । [रामः]
11) चोरः _____________ असूयति । [सज्जनाः]

**संवादः -- पारितोषिकम्** ।

(अग्रजः गणेशः १२ वर्षीयः । तस्मै सङ्गणककार्यम् अधिकं रोचते । अनुजः कुमारः गणितप्रियः। एतस्मै गणितसमस्यापरिहारकार्यं बहु रोचते । तयोः मातुलः ऐन्द्रजालिकः। सः भागिनेयाभ्यां उपायने क्रीत्वा भगिन्याः गृहम् आगच्छति )। अग्रे संभाषणं पठत ।

उमा- (माता) - आगच्छतु, अनुज । कथमस्ति भवान् ?

गणेशः, कुमारः( आगत्य) - मातुलाय नमः ।

मातुलः - आगच्छताम्. वत्सौ ! भवद्भ्यां स्वस्ति ।

उमा - गणेश, मातुलाय आसनं आनयतु । कुमार, तस्मै एतं फलरसं यच्छतु ।

मातुलः - भगिनि, मह्यं दुग्धं रोचते । तदेव ददातु ।

कुमारः - मातुल, आवाभ्यां दातुं किम् आनीतवान् भवान्?

मातुलः - आ...म् । अस्ति, अस्ति ।

कुमारः -  आवाभ्यां दर्शयतु मातुल, ..इदानीमेव ।

मातुलः - तत्तु रहस्यं भोः । इदानीमेव कथं दर्शयामि ?

गणेशः - तर्हि कदा ददाति ?

मातुलः - अहं भवद्भ्यां एकां गणितसमस्यां ददामि । प्रथमं यः मह्यं उत्तरं दर्शयति, तस्मै प्रथमपारितोषिकरूपेण ददामि ।

(कुमारः झटिति गणितसमस्यायाः उत्तराय शास्त्ररीत्या गणनकार्यं प्रारभते । गणेशः सङ्गणकस्य पुरतः उपविश्य गूगल्-द्वारा अन्वेषणं कृत्वा ह्रस्वमार्गेण स्वल्पकालावधौ एव उत्तरं प्राप्य मातुलाय दर्शयति । तस्मिन् क्षणे एव कुमारः अपि उत्तरेण सह तत्र आगच्छति । गणेशस्य हस्ते स्थितं पारितोषिकं दृष्ट्वा कुमारः तस्मै असूयति, मातुलाय क्रुध्यति च।)

कुमारः -  किमेतत् मातुल ? अहमपि समानकाले एव आगतवान् । परन्तु भवान् गणेशाय एव पारितोषिकं दत्तवानस्ति । एषः सङ्गणकम् उपयुज्य कुटिलमार्गेण एव उत्तरं प्राप्तवान् अस्ति । अहं शास्त्ररीत्या शीघ्रमेव गणनकार्यं कृत्वा समीचीनम् उत्तरं पाप्तवान् । कः लाभः ? (कुमारः दुःखेन रोदिति ।)

मातुलः - (तं सान्त्वयित्वा) कुमार ! किमर्थम् एतत्क्रन्दनम् ? भवते अपि पारितोषिकं ददामि एव, स्वीकरोतु ।( कुमाराय पारितोषिकं ददाति) गणेशः चातुर्येण सङ्गणकम् उपयुज्य शीघ्रं कार्यं कृतवान् ।  भवान् भवतः नैपुण्यम् उपयुज्य शीघ्रम् उत्तरं प्राप्तवान् । भवन्तौ द्वौ अपि प्रशंसार्हौ एव । गणेशस्य चातुर्याय, भवतः नैपुण्याय च अहं पुनः अन्यमेकम् उपायनमपि ददामि । परन्तु तत्तु एकं मन्त्रकन्दुकम् । भवन्तौ कलहं विना परस्परं स्नेहभावेन क्रीडताम् । अन्यथा तत् कन्दुकं मम मन्त्रबलेन पुनः मम समीपमेव स्वयम् आगच्छति । (मातुलः उपायेन युतककोशतः एकं वर्णरञ्जितकन्दुकं निष्कास्य ताभ्यां ददाति) ।

**अभ्यासः** - अस्मिन् संभाषणे कीदृशेषु सन्दर्भेषु चतुर्थीविभक्तेः प्रयोगः कृतः अस्ति इति दृष्ट्वा तादृशान् सन्दर्भान् उपयुज्य वाक्यानि रचयत-- (भिन्न-लिङ्ग-वचनरूपाणि उपयुज्य) ।

# 13. पत्रं वृक्षात् पतति (पञ्चमीविभक्तिः)

**अ) एतानि वाक्यानि पठत, रिक्तस्थानानि पूरयत च ।**

1) पत्राणि वृक्षात् पतन्ति । पत्राणि वृक्षाभ्यां पतन्ति । पत्राणि वृक्षेभ्यः पतन्ति ।

2) नदी हिमालयात् प्रवहति । नद्यः तडाग-पर्वताभ्यां प्रवहन्ति । नद्यः पर्वतेभ्यः प्रवहन्ति ।

3) खगः वृक्षात् डयते । खगाः द्वाभ्यां ___________ डयन्ते । खगाः अनेकेभ्यः ___________ डयन्ते । [वृक्ष]

4) फलानि तरोः पतन्ति । फलानि तरुभ्यां पतन्ति । फलानि तरुभ्यः पतन्ति । [तरु]

5) सः भवतः पत्रं स्वीकरिष्यति । सः भवद्भ्यां पत्रं स्वीकरिष्यति । सः ___________ पत्रं स्वीकरिष्यति । [भवत् (भवान्)]

6) भिक्षुकः दातुः धनं स्वीकरोति । भिक्षुकौ दातृभ्यां धनं स्वीकुरुतः । भिक्षुकाः ___________ धनं स्वीकुर्वन्ति । [दातृ (दाता)]

| |
|---|
| **इदम् अवधेयम्** – विभागः यदा भवति तदा यः अवधिभूतः भवति तस्य पञ्चमीविभक्तिः भवति । |

7) यतिः नद्याः जलम् आनयति । यतिः नदीभ्यां जलम् आनयति । यतिः ___________ जलम् आनयति । [नदी]

8) बालकः मातुः स्यूतं स्वीकरोति । बालकौ ___________ स्यूतं स्वीकुरुतः । बालकाः ___________ स्यूतं स्वीकुर्वन्ति । [मातृ (माता)]

9) पुष्पं लतायाः अपतत् । पुष्पे ___________अपतताम् । पुष्पाणि ___________अपतन् । [पुष्प]

10) अहं ___________ पुस्तकं प्राप्नोमि । [ भवान् ]

11) छात्राः त्वत् प्रेरणां प्राप्नुवन्तु । छात्राः युवाभ्यां प्रेरणां प्राप्नुवन्तु । छात्राः युष्मत् प्रेरणां प्राप्नुवन्तु ।

12)त्वं मत् धनं स्व्यकरोः। त्वम् आवाभ्यां धनं स्व्यकुरुतम्। त्वम् अस्मत् धनं स्व्यकुरुत।

| |
|---|
| **इदम् अवधेयम्** - यस्मात् भीतिः भवति, तस्य पदस्य पञ्चमीविभक्तिः भवति। |

**आ) रिक्तस्थानानि पूरयत।**

1) मृगः व्याघ्रात् बिभेति।
2) बिडालः शुनकात् बिभेति। बिडालाः द्वाभ्यां ___________ बिभ्यति। बिडालाः शुनकेभ्यः बिभ्यति।
3) बालकाः ___________ भीताः भवन्ति। [ पिशाचाः ]
4) राजा शत्रोः भीतः भवति।
5) अहो ! शैत्यम् ___________ भीतम् इव पलायते ! [ औष्ण्यम् ]
6) सर्वे ___________ बिभ्यति। [ कष्टानि ]

| |
|---|
| **इदम् अवधेयम्** – यदा रक्षणं भवति, तदा यस्मात् रक्षणं भवति, तस्य पदस्य पञ्चमीविभक्तिः भवति। |

**इ) रिक्तस्थानानि पूरयत।**

1) विष्णुः मकरात् गजेन्द्रं रक्षितवान्।
2) बालकः ___________ भगिनीं रक्षितवान्। [ अपायः ]
3) इन्द्रः ___________ देवान् रक्षति। [ दानवाः ]
4) राजा शत्रुभ्यः प्रजाः रक्षति।
5) आरक्षकाः ___________ जनान् रक्षन्ति। [ चोराः ]
6) रामः ___________ सीतां रक्षितवान्। [ रावणः ]

**ई) रिक्तस्थानानि पूरयत।**

| इदम् अवधेयम् – बहिः, ऋते, आरभ्य, पूर्वं, परः इति एतेषां शब्दानां प्रयोगे पञ्चमीविभक्तिः भवति । |
|---|

1) सः भवनात् बहिः गतवान् ।
2) ___________ आरभ्य परीक्षा भवति । [ बुधवासरः ]
3) तस्मात् पूर्वम् अहं पठामि ।
4) सः ___________ ऋते न गच्छति । [ सा ]
5) वैशाखमासः चैत्रमासात् परः ।
6) आषाढः ___________ परः । [ ज्येष्ठ ]
7) ___________ पूर्वं हस्तौ प्रक्षालयतु । [ भोजनम् ]

**एतं पाठम् उच्चैः पठत ।**

मम मातुलः मातुलानी च देहलीनगर्याः आगतवन्तौ । तौ गृहम् आनेतुं वयं यानस्थानकं गतवन्तः । स्थानकात् बहिः वयं तयोः प्रतीक्षां कृतवन्तः । यदा तौ प्राप्तवन्तौ, वयं सन्तोषेण स्वागतं कृतवन्तः । ततः वयं यानस्थानकात् गृहम् आगतवन्तः । मातुलानी मत् बहून् प्रश्नान् कृतवती । "विद्याभ्यासः कथम् अस्ति ? मित्राणि कथं सन्ति ? प्रभाते पाठशाला कदा गच्छति ? सायङ्काले च पाठशालायाः कदा आगच्छति ?" इति ।

तौ पञ्चमदिनाङ्कात् षोडशदिनाङ्कपर्यन्तम् अत्र आस्ताम् । प्रतिदिनं शालातः आगत्य ताभ्यां सह अटनार्थं गच्छामि स्म । कदाचित् क्रयणार्थं गच्छामः स्म । तदा आपणात् आपणं भ्रमामः स्म । रात्रेः पूर्वं गृहं प्रत्यागच्छामः स्म । भोजनात् अनन्तरं चतुरङ्कादिकाः क्रीडाः क्रीडामः स्म । निद्रायाः पूर्वं मातुलानी कथां श्रावयति स्म । तानि दिनानि शीघ्रमेव यातानि ! षोडशे दिनाङ्के तौ इतः प्रस्थाय देहलीनगरं प्रतिगतवन्तौ।

**एतस्मिन् कोष्टके पञ्चमीविभक्तिरूपाणि सन्ति । तानि परिशीलयत ।**

| प्रातिपदिकम् | प्रथामाविभक्तिः, एकवचनम् | पञ्चमीविभक्तिः, एकवचनम् | पञ्चमीविभक्तिः, द्विवचनम् | पञ्चमीविभक्तिः,, बहुवचनम् |
|---|---|---|---|---|

| | | | | |
|---|---|---|---|---|
| सेवक (अकारान्तः पुंलिङ्गशब्दः) | सेवकः | सेवकात् | सेवकाभ्याम् | सेवकेभ्यः |
| लता (आ. स्त्री.) | लता | लतायाः | लताभ्याम् | लताभ्यः |
| मित्र (अ. नपुं.) | मित्रम् | मित्रात् | मित्राभ्याम् | मित्रेभ्यः |
| अतिथि (इ. पुं.) | अतिथिः | अतिथेः | अतिथिभ्याम् | अतिथिभ्यः |
| गुरु (उ. पुं.) | गुरुः | गुरोः | गुरुभ्याम् | गुरुभ्यः |
| पितृ (ऋ. पुं.) | पिता | पितुः | पितृभ्याम् | पितृभ्यः |
| मातृ (ऋ. स्त्री.) | माता | मातुः | मातृभ्याम् | मातृभ्यः |
| भगिनी (ई. स्त्री.) | भगिनी | भगिन्याः | भगिनीभ्याम् | भगिनीभ्यः |
| मूर्तिः (इ. स्त्री.) | मूर्तिः | मूर्तेः / मूर्त्याः | मूर्तिभ्याम् | मूर्तिभ्यः |
| धेनु (उ. स्त्री.) | धेनुः | धेनोः / धेन्वाः | धेनुभ्याम् | धेनुभ्यः |
| तद् (द. पुं.) | सः | तस्मात् | ताभ्याम् | तेभ्यः |
| तद् (द. स्त्री.) | सा | तस्याः | ताभ्याम् | ताभ्यः |
| तद् (द. नपुं.) | तत् | तस्मात् | ताभ्याम् | तेभ्यः |
| किम् ( पुं.) | कः | कस्मात् | काभ्याम् | केभ्यः |
| युष्मद् (द. उभय.) | त्वम् | त्वत् | युवाभ्याम् | युष्मत् |
| अस्मद् (द. उभय.) | अहम् | मत् | आवाभ्याम् | अस्मत् |
| भवत् (त. पुं.) | भवान् | भवतः | भवद्भ्याम् | भवद्भ्यः |
| भवत् (त. स्त्री.) | भवती | भवत्याः | भवतीभ्याम् | भवतीभ्यः |
| सर्व (अ. पुं.) | सर्वः | सर्वस्मात् | सर्वाभ्याम् | सर्वेभ्यः |
| सर्व (आ. स्त्री.) | सर्वा | सर्वस्याः | सर्वाभ्याम् | सर्वाभ्यः |
| सर्व (अ. नपुं.) | सर्वम् | सर्वस्मात् | सर्वाभ्याम् | सर्वेभ्यः |

**उ) आवरणे दत्तानां पदानाम् उचितैः रूपैः रिक्तस्थानानि पूरयत -**

1) _________ [ हिमालयः ] उन्नतः पर्वतः नास्ति ।

2) _________ [ नगराणि ] बहिः अरण्यम् अस्ति ।

3) आरक्षकः ________ ________ [ तौ चोरौ ] रक्षति ।

4) भीरवः _______ [ रणरङ्गः ] पलायन्ते ।

5) गङ्गा ___________ [ हिमालयः ] प्रवहति ।

6) अश्रूणि ________ [ नेत्रे ] स्रवन्ति ।

7) ________ [ वाटिकाः ] बहिः मार्गाः सन्ति ।

8) भक्तः ________ [ विष्णुः ] वरं प्राप्नोति ।

9) पुरुषः ________ [ द्विचक्रिका ] पतति ।

10)जनाः ________ [ पाकशाला ] भोजनम् आनयन्ति ।

11) ________ [ नववादनम् ] आरभ्य कक्ष्या भविष्यति ।

12)क्रोधः ________ [ कामः ] जायते ।

13)बालकः ________ [ स्वसारः ] आशीर्वादं प्राप्नोति ।

14)नकुलः बालकम् ________ [ सर्पः ] रक्षति ।

15)भिक्षुकः ________ [ गृहिण्यः ] आहारं याचते ।

16)अहं ________ [ भवान् ] संस्कृतं पठितुम् इच्छामि ।

17)भवान् ________ [ कः ] संस्कृतम् अधीते ?

18) किं सः ________ [ यूयम् ] अपि ऋणं स्वीकृतवान् ?

19)शिशुः ________ [ शुनकः ] बिभेति । माता शिशुं ________ [ सः ] रक्षति ।

20)जनाः प्रासादात् पश्यन्ति । जनाः ___________ पश्यन्ति । जनाः ___________ पश्यन्ति । [ प्रासाद ]

# 14. खट्वारूढः (षष्ठीविभक्तिः)

भवतः नाम किम् ? मम नाम दिलीपः ।

भवत्याः नाम किम् ? मम नाम गीता ।

लते, तस्य नाम किम् ? तस्य नाम सुरेशः ।

अ) रिक्तस्थानानि पूरयत ।

1) हरे, एतत् कस्य पुस्तकम् ? एतत् शम्भोः पुस्तकम् ।

शम्भो, एतत् तव पुस्तकं किम् ? आम्, एतत् मम पुस्तकम् ।

एषः कस्य स्यूतः अस्ति ? एषः ______________ स्यूतः अस्ति । [ नागराजः ]

2) वयं ______________ गृहे मिलामः । [ रविः ]

तस्य गृहस्य अपेक्षया ______________ गृहं समीपे अस्ति । [ रघुः ]

3) राजीव, एषा तव घटी वा ? न, एषा मम पितुः घटी ।

4) गीते, एतत् पुस्तकं तव ______________ कृते ददातु । [ माता ]

5) अपर्णे, पश्य पश्य! शिशुः कथं पितरति ! आम्, सखि । सः अनुकरणशीलः ! ______________ इव एव हसति ! [ पिता ]

**आ) एतानि वाक्यानि उच्चैः पठत । रिक्तस्थानानि पूरयत च ।**

1) ______________ गायनं शृणुमः । [ मालिनी ]

2) ______________ गायनं मह्यं रोचते । [ सा ]

3) छात्राः ______________ सिद्धता करणीया ! स्मरन्ति खलु ?! [ परीक्षा ]

4) मार्गशीर्षमासे ______________ पठनं कुर्वन्ति । [ भगवद्गीता ]

**इ) एतानि वाक्यानि उच्चैः पठत । रिक्तस्थानानि पूरयत च ।**

1) राम-लक्ष्मणयोः भ्रातृत्वं प्रसिद्धम् अस्ति ।

______________ मैत्री अपि प्रसिद्धा । [राम-सुग्रीवौ ]

2) हे गिरीश, नलिनि, भवतोः पुत्रः कुत्र पठति ?

सः काश्यां पठति । तत्र गच्छाव इति ______________ इच्छा अस्ति । [ आवाम् ]

3) एतत् सीता-लतयोः गृहम् । तयोः भ्राता ईटानगरे वसति ।

______________ नाम किम् ? [ भ्राता ]

तेषां मातापितरौ संस्कृतं पाठयन्ति ।

4) मातापित्रोः लोकयानं कदा प्राप्स्यति ?

यदा एतत् लोकयानं निर्गच्छति तदा ______________ यानाम् आगच्छति । [ तौ ]

**ई) एतानि वाक्यानि उच्चैः पठत । रिक्तस्थानानि पूरयत च ।**

एतत् छात्राणाम् निवासस्थानम् ।

भवतां कः अभिप्रायः ? अस्माकं न कोऽपि विरोधः ।

प्रातः मार्गे वाहनानां सम्मर्दः आसीत् ।

एतं लतानां गुच्छं स्वीकुरु ।

अतिथीनां यान-व्यवस्थां करोमि ।

1) ______________ गृहम् आगच्छन्तु । [ वयम् ]

2) यथा ______________ आवलिः अत्र अस्ति तथा तत्रापि कुर्वन्तु । [ आसन्दाः ]

3) यः ______________ जानाति सः आगत्य भूपटे दर्शयतु । [ नद्यः ]

4) शिशूनां चित्रं ददामि ।

5) भीरुः ______________ सैन्यं दृष्ट्वा भीतः अभवत् । [ शत्रवः ]

6) अहो ! ______________ कोलाहलः ? [ के ]

7) निश्चयेन, एषः ______________ कोलाहलः । [ कपयः ]

8) श्वः पाठशालायां मातापितृणां मेलनं भविष्यति ।

**पाठः -**

कस्यचित् महर्षेः आश्रमे द्वौ शिष्यौ आस्ताम् । तयोः नाम देवदत्तः यज्ञदत्तः चेति । देवदत्तः महारजस्य सुतः । सः कदापि अध्ययने अवधानं न करोति स्म । किञ्च, यद्यपि सः शिष्यः तथापि सः अन्ये शिष्याः इव न आचरति स्म । देवदत्तः सर्वाणि सौकर्याणि अपेक्षते स्म । एतत् दृष्ट्वा महर्षिः तं पुनः पुनः वदति स्म, "देवदत्त, त्वं खट्वारूढः भवसि । राज्याय न शोभते ।" परन्तु तस्य खट्वारूढस्य आचारे परिवर्तनं न अजायत ।

यज्ञदत्तः कस्यचित् धनिकस्य पुत्रः । सः कार्ये च विद्याभ्यासे च महान् अलसः आसीत् । अन्ये छात्राः इव सः यथासमयं न उत्तिष्ठति स्म । सः अध्ययने अवधानम् एव न करोति स्म । परन्तु सः बहु जल्पति स्म ।

एतयोः कृते कश्चित् सेवकः अपि नियुङ्क्तः आसीत् । सः सर्वदा सौकर्यं कल्पयन् ताभ्यां सह गच्छति स्म । गुरुकुले वा भवतु, वने वा भवतु, आश्रमे वा भवतु, सेवकेन विना तौ कुत्रापि न गच्छतः स्म । सः भृत्यः एवम् अनुगम्य अनुगम्य सर्वासु विद्यासु निपुणः अभवत् ।

एकदा देवदत्तः यज्ञदत्तः च गुरोः अनुज्ञाम् अप्राप्य, सेवकेन सह भ्रमणार्थं वनं गतवन्तौ । द्वौ अपि वृथा संभाषणे मग्नौ आस्ताम् । मार्गे महाराजस्य शत्रवः तयोः आक्रमणम् अकुर्वन् । एतौ शस्त्रविद्यां न जानीतः स्म । सः सेवकः एकाकी एव धैर्येण युद्धं कृत्वा शत्रून् पराजितवान् । तयोः विमोचनं च अकरोत् ।

सेवकस्य धैर्यं च नैपुण्यं च दृष्ट्वा देवदत्तः अमन्यत यत्, "इतः परम् अहं खट्वारूढः न भवामि । परिश्रमं करोमि । अध्यनं च करोमि । नो चेत् मां दृष्ट्वा जनाः उपहसन्ति ।" इति । तथा यज्ञदत्तः अपि अचिन्तयत् ।

अनन्तरं एतं वृत्तान्तं ज्ञात्वा महर्षिः सेवकस्य प्रशंसां कृतवान् । "त्वम् अपि मम शिष्यः भव । नियमेन विद्याभ्यासं कुरु ।" इति तस्य आशीर्वादम् अकरोत् ।

**कोष्टके षष्ठीविभक्तिरूपाणि दत्तानि सन्ति । तानि पठत ।**

| प्रातिपदिकम् | प्रथमाविभक्तिः, एकवचनम् | षष्ठीविभक्तिः, एकवचनम् | षष्ठीविभक्तिः, द्विवचनम् | षष्ठीविभक्तिः,, बहुवचनम् |
|---|---|---|---|---|
| सेवक (अकारान्तः | सेवकः | सेवकस्य | सेवकयोः | सेवकानाम् |

| | | | | |
|---|---|---|---|---|
| पुंलिङ्गशब्दः) | | | | |
| लता (आ. स्त्री.) | लता | लतायाः | लतयोः | लतानाम् |
| मित्र (अ. नपुं.) | मित्रम् | मित्रस्य | मित्रयोः | मित्राणाम् |
| अतिथि (इ. पुं.) | अतिथिः | अतिथेः | अतिथ्योः | अतिथीनाम् |
| गुरु (उ. पुं.) | गुरुः | गुरोः | गुर्वोः | गुरूणाम् |
| पितृ (ऋ. पुं.) | पिता | पितुः | पित्रोः | पितॄणाम् |
| मातृ (ऋ. स्त्री.) | माता | मातुः | मात्रोः | मातॄणाम् |
| भगिनी (ई. स्त्री.) | भगिनी | भगिन्याः | भगिन्योः | भगिनीभ्यः |
| मूर्तिः (इ. स्त्री.) | मूर्तिः | मूर्तेः / मूर्त्याः | मूर्त्योः | मूर्तीनाम् |
| धेनु (उ. स्त्री.) | धेनुः | धेनोः / धेन्वाः | धेन्वोः | धेनूनाम् |
| तद् (द. पुं.) | सः | तस्य | तयोः | तेषाम् |
| तद् (द. स्त्री.) | सा | तस्याः | तयोः | तासाम् |
| तद् (द. नपुं.) | तत् | तस्य | तयोः | तेषाम् |
| किम् ( पुं.) | कः | कस्य | कयोः | केषाम् |
| युष्मद् (द. उभय.) | त्वम् | तव | युवयोः / वाम् | युष्माकम् / वः |
| अस्मद् (द. उभय.) | अहम् | मम | अवयोः / नौ | अस्माकम् / नः |
| भवत् (त. पुं.) | भवान् | भवतः | भवतोः | भवताम् |
| भवत् (त. स्त्री.) | भवती | भवत्याः | भवतोः | भवतीनाम् |
| सर्व (अ. पुं.) | सर्वः | सर्वस्य | सर्वयोः | सर्वेषाम् |
| सर्व (आ. स्त्री.) | सर्वा | सर्वस्याः | सर्वयोः | सर्वासाम् |
| सर्व (अ. नपुं.) | सर्वम् | सर्वस्य | सर्वयोः | सर्वेषाम् |

# 15. कुञ्चिका कुत्र अस्ति ? (सप्तमीविभक्तिः)

१. ऋषिः **आश्रमे** वसति ।
२. तैलं **दर्व्याम्** अस्ति ।
३. कङ्कणे **हस्तयोः** स्तः ।
४. यानानि **मार्गे** सन्ति ।
५. मृगाः **वनेषु** सन्ति ।
६. पुष्पाणि **लतायां** विकसन्ति ।
७. वानराः **शाखासु** उपविशन्ति ।
८. जनाः **वीथीषु** सञ्चरन्ति ।
९. चक्रं विष्णोः **पाणौ** अस्ति ।
१०. रसः **इक्षौ** अस्ति ।

**इदम् अवधेयम्** - सर्वेषामपि वस्तूनां कोऽपि आधारः वर्तते एव । एवं यः आधारः भवति तस्य सप्तमीविभक्तिः भवति । उपरितनेषु वाक्येषु **उल्लेखितानि पदानि** सप्तमीविभक्तौ सन्ति ।

अ) अधः सूचितान् आधारभूतान् शब्दान् आश्रित्य वाक्यानि रचयत ।
{ भारतदेशः च् कर्णटकराज्यम् → बेङ्गलूरुनगरम् → गिरिनगरक्षेत्रम् → अक्षरभवनम् → संस्कृतभारतीकार्यालयः }

1) भारतदेशे कर्णातकराज्यम् अस्ति ।

2) _____________ बेङ्गलूरुनगरम् अस्ति ।

3) _____________ _____________ अस्ति ।

4) _____________ _____________ अस्ति ।

5) _____________ संस्कृतभारतीकार्यालयः अस्ति ।

आ) { नगरम् →उद्यानानि → वृक्षाः → शाखाः→ पुष्पाणि → भ्रमराः }

1) नगरे उद्यानानि सन्ति ।

2) _____________ _____________ सन्ति ।

3) _____________ _____________ सन्ति ।

4) _____________ _____________ सन्ति ।

5) _____________ भ्रमराः सन्ति ।

| प्रातिपदिकम् | प्रथमाविभक्तिः, एकवचनम् | सप्तमीविभक्तिः, एकवचनम् | सप्तमीविभक्तिः, द्विवचनम् | सप्तमीविभक्तिः,, बहुवचनम् |
|---|---|---|---|---|
| सेवक (अकारान्तः पुंलिङ्गशब्दः) | सेवकः | सेवके | सेवकयोः | सेवकेषु |
| लता (आ. स्त्री.) | लता | लतायाम् | लतयोः | लतासु |
| मित्र (अ. नपुं.) | मित्रम् | मित्रे | मित्रयोः | मित्रेषु |
| अतिथि (इ. पुं.) | अतिथिः | अतिथौ | अतिथ्योः | अतिथिषु |
| गुरु (उ. पुं.) | गुरुः | गुरौ | गुर्वोः | गुरुषु |
| पितृ (ऋ. पुं.) | पिता | पितरि | पित्रोः | पितृषु |
| मातृ (ऋ. स्त्री.) | माता | मातरि | मात्रोः | मातृषु |
| भगिनी (ई. स्त्री.) | भगिनी | भगिन्याम् | भगिन्योः | भगिनीषु |
| मूर्तिः (इ. स्त्री.) | मूर्तिः | मूर्तौ / मूर्त्याम् | मूर्त्योः | मूर्तिषु |
| धेनु (उ. स्त्री.) | धेनुः | धेनौ / धेन्वाम् | धेन्वोः | धेनुषु |
| तद् (द. पुं.) | सः | तस्मिन् | तयोः | तेषु |
| तद् (द. स्त्री.) | सा | तस्याम् | तयोः | तासु |
| तद् (द. नपुं.) | तत् | तस्मिन् | तयोः | तेषु |
| किम् ( पुं.) | कः | कस्मिन् | कयोः | केषु |
| युष्मद् (द. उभय.) | त्वम् | त्वयि | युवयोः | युष्मासु |
| अस्मद् (द. उभय.) | अहम् | मयि | अवयोः | अस्मासु |
| भवत् (त. पुं.) | भवान् | भवति | भवतोः | भवत्सु |
| भवत् (त. स्त्री.) | भवती | भवत्याम् | भवतोः | भवतीषु |
| सर्व (अ. पुं.) | सर्वः | सर्वस्मिन् | सर्वयोः | सर्वेषु |

| | | | | |
|---|---|---|---|---|
| सर्व (आ. स्त्री.) | सर्वा | सर्वस्याम् | सर्वयोः | सर्वासु |
| सर्व (अ. नपुं.) | सर्वम् | सर्वस्मिन् | सर्वयोः | सर्वेषु |

**इ) कोष्टकम् उदाहरणं च दृष्ट्वा रिक्तस्थानानि पूरयत ।**

कोलाहलः - मेला -- कोलाहलः मेलायां भवति ।

1) प्रकाशः - दीपः - ___________ ___________ अस्ति ।

2) विमानम् - आकाशः - ___________ ___________ ___________ ।

3) उत्सवः - वीथी - ___________ ___________ ___________ ।

4) भ्रमरः - पुष्पम् - ___________ ___________ ___________ ।

5) प्रतिभा - कविः - ___________ ___________ ___________ ।

6) जलम् - कूपी - ___________ ___________ ___________ ।

**ई) उदाहरणानुगुणं वाक्यानि लिखत ।**

उदा -- कर्णाभरणे - (कर्णौ) ___________ स्तः।

कर्णाभरणे कर्णयोः स्तः ।

1) नूपुरे -- पादौ ___________ स्तः ।

2) कङ्कणे -- हस्तौ ___________ स्तः ।

3) अङ्गुलीयकानि - अङ्गुल्यः ___________ सन्ति ।

4) सिंहाः -- वनानि ___________ सन्ति ।

5) कथाः -- सञ्चिकाः ___________ सन्ति ।

6) वानराः -- तरवः ___________ सन्ति ।

7) भूषणानि -- पेटिकाः ___________ सन्ति ।

8) मीनाः -- नद्यः ___________ सन्ति ।

> **इदम् अवधेयम्** - निपुणकुशलादीनां प्रयोगे सप्तमीविभक्तिः भवति ।

१. सः "व्यवहारे" कुशलः।(व्यवहारः) २. सा "वीणावादने" निपुणा । ३. रमेशः क्रीडायां (क्रीडा) पटुः ।

**उ) उदाहरणानुगुणं वाक्यानि लिखत ।**

उदा. मम जननी "पाककार्ये" समर्था । (पाककार्यम्)

1) अर्जुनः ___________ प्रवीणः । [ धनुर्विद्या ]

2) भवती ___________ एव निपुणा । [ जल्पनम् ]

3) श्रीरामः ___________ शूरः । [ रणम् ]

4) नलिनी सर्वासु ___________ अग्रेसरा । [ क्रीडा ]

5) कुमारः ___________ अलसः । [ कार्यम् ]

6) ऋषयः ___________ सरलाः । [ जीवनम् ]

7) एषः बालकः ___________ मन्दः । [ भोजनम् ]

> **इदम् अवधेयम्** - प्रीतिः, भक्तिः, स्नेहः, आदरः, आसक्तिः, विनयः, नम्रता, इत्यादीनां प्रयोगे सप्तमीविभक्त्याः प्रयोगः ।

**ऊ) उदाहरणानुगुणं वाक्यानि लिखत ।**

उदा -- सुरेशः तस्मिन् [ सः ] प्रीतिं प्रदर्शयति ।

1) सुरेशः ___________ [ भवान् ] भक्तिं प्रदर्शयति ।

2) सुरेशः ___________ [ भवती ] विनयं प्रदर्शयति ।

3) सुरेशः ___________ [ त्वम् ] विश्वासं प्रदर्शयति ।

4) सुरेशः ____________ [ ताः ] नम्रतां प्रदर्शयति ।

5) सुरेशः ____________ [ भवन्तः ] श्रद्धां प्रदर्शयति ।

6) सुरेशः ____________ [ यूयम् ] गौरवं प्रकटयति ।

7) सुरेशः ____________ [ सर्वे ] स्नेहं प्रदर्शयति ।

8) सुरेशः ____________ [ भवत्यः ] आदरं प्रदर्शयति ।

9) सुरेशः ____________ [ अहम् ] सौजन्यं प्रदर्शयति ।

10) सुरेशः ____________ [ वयम् ] वात्सल्यं प्रकटयति ।

| |
|---|
| इदम् अवधेयम् - निर्धारणे सप्तमीविभक्तिः भवति । |

**ऋ) उदाहरणानुगुणं वाक्यानि लिखत ।**

उदा -- धर्मराजः [ पाण्डवाः ] ज्येष्ठः । -- धर्मराजः पाण्डवेषु ज्येष्ठः ।

1) रामः [ पुरुषाः ] उत्तमः । रामः ____________ ____________ ।

2) काकः [ खगाः ] चतुरः । काकः ____________ ____________ ।

3) गजः [ मृगाः ] स्थुलः । गजः ____________ ____________ ।

4) कमलम् [ पुष्पाणि ] उत्तमम् । मल्लिका ____________ ____________ ।

5) गङ्गा [ नद्यः ] पवित्रा । गङ्गा ____________ ____________ ।

| |
|---|
| **इदम् अवधेयम्** - अङ्गे ग्रहणं, ताडनं, प्रहरणम् इत्यादीनां सन्दर्भे यस्मिन् अङ्गे ग्रहणम् इत्यादिकं भवति तस्य अङ्गस्य सप्तमीविभक्तिः भवति । |

उदा -- १. आरक्षकः चोरं [ कण्ठः ] कण्ठे गृहीतवान् । २. आञ्जनेयः राक्षसं [ वक्षस्थलम् ] वक्षस्थले प्रहृतवान् ।

ॠ) उदाहरणं दृष्ट्वा वाक्यानि पूरयत ।

1) रमेशः सहोदरं [ मस्तकम् ] ____________ ताडितवान् ।

2) राक्षसी सीतां [ केशाः ] ____________ गृहीतवती ।

3) मल्लः अन्यं मल्लम् [ उदरम् ] ____________ ताडितवान् ।

4) भवान् माम् किमर्थं [ पादौ ] ____________ प्रहरति ?

5) भटः चोरं [ कपोलः ] ____________ ताडयति ।

| |
|---|
| **इदम् अवधेयम्** - प्रायः "कदा" इत्यस्य उत्तररूपे अपि सप्तमीविभक्तिः भवति । |

**एतत् संभाषणं पठित्वा अवगच्छत ।**

मातुलः - सुधीर, भवान् प्रातः कदा उत्तिष्ठति ?

सुधीरः - महोदये, अहं प्रातः पञ्चवादने उत्तिष्ठामि ।

मातुलः - प्रातः भ्रमणाय कदा गच्छति ?

सुधी - प्रातः भ्रमणाय सार्धपञ्चवादने गच्छामि ।

मातुलः - भवान् विद्यालयं कदा गच्छति ?

सुधी - विद्यालयं पादोननववादने गच्छामि ।

मातुलः - भवतः विद्यालये क्रीडोत्सवः कदा अस्ति ?

सुधी - मम विद्यालये क्रीडोत्सवः "अगस्त"मासे अस्ति ।

मातुलः - भवतः सङ्गीतकक्ष्या कदा भवति ?

सुधी - मम सङ्गीतकक्ष्या मङ्गलवासरे भवति ।

मातुलः - अहम् एकवारं भवतः विद्यालयम् आगन्तुम् इच्छामि । भवान् मां कदा नयति ?

सुधी - सन्तोषेण नयामि । अग्रिमे सप्ताहे गुरुवासरे अस्माकं विद्यालये संस्कृतशिबिरस्य उद्घाटनम् अस्ति । तदा अहं भवन्तं नयामि।

मातुलः - अस्तु। तदैव आगमिष्यामि । गच्छावः। पुनः मिलावः ।

# 16. सङ्ख्याः

| | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| १ | एकम् | । | २१ | एकविंशतिः | । | ४१ | एकचत्वारिंशत् | । | ६१ | एकषष्टिः | । | ८१ | एकाशीतिः | । |
| २ | द्वे | । | २२ | द्वाविंशतिः | । | ४२ | द्विचत्वारिंशत् | । | ६२ | द्विषष्टिः | । | ८२ | द्व्यशीतिः | । |
| ३ | त्रीणि | । | २३ | त्रयोविंशतिः | । | ४३ | त्रिचत्वारिंशत् | । | ६३ | त्रिषष्टिः | । | ८३ | त्र्यशीतिः | । |
| ४ | चत्वारि | । | २४ | चतुर्विंशतिः | । | ४४ | चतुश्चत्वारिंशत् | । | ६४ | चतुःषष्टिः | । | ८४ | चतुरशीतिः | । |
| ५ | पञ्च | । | २५ | पञ्चविंशतिः | । | ४५ | पञ्चचत्वारिंशत् | । | ६५ | पञ्चषष्टिः | । | ८५ | पञ्चाशीतिः | । |
| ६ | षट् | । | २६ | षड्विंशतिः | । | ४६ | षट्चत्वारिंशत् | । | ६६ | षट्षष्टिः | । | ८६ | षडशीतिः | । |
| ७ | सप्त | । | २७ | सप्तविंशतिः | । | ४७ | सप्तचत्वारिंशत् | । | ६७ | सप्तषष्टिः | । | ८७ | सप्ताशीतिः | । |
| ८ | अष्ट | । | २८ | अष्टाविंशतिः | । | ४८ | अष्टचत्वारिंशत् | । | ६८ | अष्टषष्टिः | । | ८८ | अष्टाशीतिः | । |
| ९ | नव | । | २९ | नवविंशतिः | । | ४९ | नवचत्वारिंशत् | । | ६९ | नवषष्टिः | । | ८९ | नवाशीतिः | । |
| १० | दश | । | ३० | त्रिंशत् | । | ५० | पञ्चाशत् | । | ७० | सप्ततिः | । | ९० | नवतिः | । |
| ११ | एकादश | । | ३१ | एकत्रिंशत् | । | ५१ | एकपञ्चाशत् | । | ७१ | एकसप्ततिः | । | ९१ | एकनवतिः | । |
| १२ | द्वादश | । | ३२ | द्वात्रिंशत् | । | ५२ | द्विपञ्चाशत् | । | ७२ | द्विसप्ततिः | । | ९२ | द्विनवतिः | । |
| १३ | त्रयोदश | । | ३३ | त्रयस्त्रिंशत् | । | ५३ | त्रिपञ्चाशत् | । | ७३ | त्रिसप्ततिः | । | ९३ | त्रिनवतिः | । |
| १४ | चतुर्दश | । | ३४ | चतुस्त्रिंशत् | । | ५४ | चतुश्पञ्चाशत् | । | ७४ | चतुस्सप्ततिः | । | ९४ | चतुर्नवतिः | । |
| १५ | पञ्चदश | । | ३५ | पञ्चत्रिंशत् | । | ५५ | पञ्चपञ्चाशत् | । | ७५ | पञ्चसप्ततिः | । | ९५ | पञ्चनवतिः | । |
| १६ | षोडश | । | ३६ | षट्त्रिंशत् | । | ५६ | षट्पञ्चाशत् | । | ७६ | षट्सप्ततिः | । | ९६ | षण्णवतिः | । |
| १७ | सप्तदश | । | ३७ | सप्तत्रिंशत् | । | ५७ | सप्तपञ्चाशत् | । | ७७ | सप्तसप्ततिः | । | ९७ | सप्तनवतिः | । |
| १८ | अष्टादश | । | ३८ | अष्टात्रिंशत् | । | ५८ | अष्टपञ्चाशत् | । | ७८ | अष्टसप्ततिः | । | ९८ | अष्टनवतिः | । |
| १९ | नवदश | । | ३९ | नवत्रिंशत् | । | ५९ | नवपञ्चाशत् | । | ७९ | नवसप्ततिः | । | ९९ | नवनवतिः | । |
| २० | विंशतिः | । | ४० | चत्वारिंशत् | । | ६० | षष्टिः | । | ८० | अशीतिः | । | १०० | शतम् | । |

**अभ्यासाः**

**१. 'कति सन्ति' इति लिखन्तु --**

यथा (२) द्वौ हस्तौ ।

(१) __________ शिरः ।  (२६) __________ दिवसाः ।

(१) __________ नासिका ।  (२८) __________ करवस्त्राणि ।

(२) __________ चित्रे ।  (३२) __________ दन्ताः ।

(१०) __________ अङ्गुल्यः ।  (३३) __________ स्तम्भाः ।

(१) __________ मुखम् ।  (३४) __________ सोपानानि ।

(२) __________ नेत्रे ।  (३८) __________ ग्रन्थाः ।

(१) __________ पत्रिका ।  (४२) __________ लेखन्यः ।

(३) __________ फलानि ।  (४४) __________ घटाः ।

(४) __________ व्यजनानि ।  (४८) __________ चमसाः ।

(८) __________ पर्णानि ।  (५४) __________ चषकाः ।

(५) __________ पाञ्चालिकाः ।  (६४) __________ इष्टिकाः ।

(७४) __________ पनसफलानि ।  (७२) __________ नारङ्गफलानि ।

(८०) __________ छात्राः ।  (७८) __________ जम्बीरफलानि ।

(८२) __________ छायाचित्राणि ।  (८१) __________ स्थालिकाः ।

(५०) __________ शिक्षिकाः ।  (८३) __________ दर्पणाः ।

(८६) __________ द्रोण्यः ।  (८४) __________ दीपाः ।

(८८) __________ वानराः ।  (७०) __________ व्याघ्राः ।

(९४) __________ विद्युद्दीपाः ।  (१०) __________ पिपीलिकाः ।

*********** एकतः परार्धपर्यन्तं सङ्ख्याः ***********

पठित्वा अवगच्छत -

१ एकम्

१० दश

१०० शतम्

१००० सहस्रम्

१०००० अयुतम्

१००००० लक्षम्

१०००००० नियुतम्

१००००००० कोटिः

१०००००००० अर्बुदम्

१००००००००० वृन्दम्

१०००००००००० खर्वः

१००००००००००० निखर्वः

१०००००००००००० शङ्खः

१००००००००००००० पद्मः

१०००००००००००००० सागरः

१००००००००००००००० अन्त्यम्

१०००००००००००००००० मध्यम्

१००००००००००००००००० परार्धम्

---

श्लोकं पठत, स्मरत च --

एकं दशं शतं चैव सहस्रमयुतं तथा ।

लक्षं च नियुतं चैव कोटिरर्बुदमेव च ॥

वृन्दं खर्वो निखर्वश्च शङ्खः पद्मश्च सागरः ।

अन्त्यं मध्यं परार्धं च दशवृद्ध्या यथाक्रमम् ॥

# 17. धीरा बाला (विशेषण-विशेष्यसम्बन्धः)

**एतानि वाक्यानि पठत ।**

(अत्र १,२,३ (अधः दत्तवाक्यानुसारं चित्राणि स्थापयितव्यानि)।

१.स्थूलः पुरुषः । २. दीर्घा नदी । ३. विशालं गृहम् ।

उपरितनवाक्येषु- (पुरुषस्य) स्थूलत्वं, (नद्याः) दीर्घता, (गृहस्य) विशालत्वं एताः विशेषताः सन्ति । यत् पदं विशेषतां सूचयति, तत् विशेषणम् । अतः "स्थूलः, दीर्घा, विशालम्" इत्येतानि विशेषणानि । यस्य पदस्य विशेषता सूच्यते तत् विशेष्यम् । "पुरुषः, नदी, गृहम्" इत्येतानि विशेष्याणि ।

- विशेषणस्य विशेष्यस्य च सम्बन्धः एव विशेषण-विशेष्यभावः। यथा -

यथा---

| विशेषणम् | विशेष्यम् |
|---|---|
| निर्मलः | आकाशः |
| गभीरः | सागरः |
| दीर्घः | मार्गः |
| नूतना | शाटिका |
| उत्तमा | लेखनी |

| विशेषणम् | विशेष्यम् |
|---|---|
| श्वेतम् | वस्त्रम् |
| उन्नतम् | शिखरम् |
| दिव्यम् | औषधम् |
| कृशा | बालिका |
| प्रसिद्धा | कथा |

अ) उदाहरणानुसारं विशेषण-विशेष्ययोः अङ्कनं कुरुत --

| उदा :- | विशेषणम् | विशेष्यम् |
|---|---|---|
| सुन्दरं चित्रम्। | सुन्दरम् | चित्रम् |

१. प्रसिद्धः नायकः।
२. श्वेतं पुष्पम्।
३. दीर्घा नासिका।
४. वामनः युवकः।
५. नुतना लेखनी।
६. मनोहरं दृश्यम्।

**** विशेषण-विशेष्यभावस्य विषये स्मर्तव्याः विषयाः केचन सन्ति।

अ.    अधस्तनवाक्यानि सावधानं पठत --

--------------------------------------

पुं.                    स्त्री.                    नपुं.

--------------------------------------

| पुंलिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|
| विशालः सागरः | विशाला नदी | विशालं भवनम् |
| नीलः मेघः | नीला शाटिका | नीलं यानम् |
| दीर्घः मार्गः | दीर्घा रेखा | दीर्घं वस्त्रम् |
| महान् सन्तोषः | महती प्रीतिः | महत् धैर्यम् |

अत्र "विशाल, नील, दीर्घ, महत्" इत्यादीनि विशेषणानि त्रिषु लिङ्गेष्वपि प्रयुक्ताः सन्ति।

**इदम् अवधेयम्**

१. प्रायः विशेषणवाचकानां प्रयोगः त्रिषु लिङ्गेष्वपि भवति।
२. प्रायः विशेष्यपदस्य लिङ्गानुरूपं विशेषणपदस्य अपि लिङ्गं वर्तते।

आ) उदाहरणानुसारं विशेष्यस्य लिङ्गानुसारं विशेषणस्य प्रयोगं कुरुत --

उदा. -

[ सुन्दर ] -----(बालकः, शाटिका, चित्रम्)। ---  १. सुन्दरः बालकः, २. सुन्दरी शाटिका, ३. सुन्दरं चित्रम्।

१.  [ स्वच्छ ] (द्रर्पणः, वापी, वस्त्रम्)।

२.  [ प्रसिद्ध ] ( नगरं, पुरुषः, गायिका)।

३.  [ प्राचीन ] ( पेटिका, भवनं, ग्रन्थः)।

अधस्तनवाक्यानि सावधानं पठत ---

| एकवचनम्. | द्विवचनम्. | बहुवचनम् |
|---|---|---|
| कुशलः पुत्रः । | कुशलौ पुत्रौ । | कुशलाः पुत्राः । |
| दीर्घा लता । | दीर्घे लते । | दीर्घाः लताः । |
| मधुरं फलम् । | मधुरे फले । | मधुराणि फलानि। |

उपरितनेषु वाक्येषु विशेष्यस्य वचनानुरूपं विशेषणस्य वचनमपि दर्शितमस्ति । अतः अवधेयम् ---

* प्रायेण विशेष्यस्य यद्वचनं तदेव वचनं विशेषणस्यापि भवति ।

इ) विशेष्यस्य वचननानुसारं विशेषणस्य प्रयोगं कुरुत --

1) (शोभन) ..........घटी। ............घट्यौ।...........घट्यः।

2) (शान्त) ..........आश्रमः।..........आश्रमौ।..........आश्रमाः।

3) (कृष्ण)............फलकम्।..........फलके।............फलकानि।

4) (उत्तम) ............,महिला।.............महिले।........महिलाः।

ई) अधस्तनानि वाक्यानि अवधानेन पठत । त्रिषु लिङ्गेषु वाक्यानि भवन्ति ।

1) प्रथमा - उत्तमः बालकः अस्ति । ज्येष्ठा महिला अस्ति। श्रेष्ठं कार्यं तत् ।

2) द्वितीया - उत्तमं बालकम् आह्वयतु । ज्येष्ठां महिलां पश्यतु । श्रेष्ठं कार्यं कुरुत।

3) तृतीया - उत्तमेन बालकेन सह गृहं गच्छतु । ज्येष्ठ्या महिलया सह गच्छतु । श्रेष्ठेन कार्येण _______ ।

4) चतुर्थी - उत्तमाय बालकाय फलं ददातु । ज्येष्ठायै महिलायै _______ । _________________ ।

5) पञ्चमी - उत्तमात् बालकात् पुस्तकं स्वीकरोतु । ज्येष्ठायाः महिलायाः । ___________

___________ ।

6) षष्ठी - उत्तमस्य बालकस्य गृहं कुत्र अस्ति ? ज्येष्ठायाः महिलायाः __________ । _______

________ ।

7) सप्तमी - उत्तमे बालके प्रीतिं दर्शयतु । ज्येष्ठायां महिलायां ____________ । _________

__________ ।

उपरितनेषु वाक्येषु विशेष्यपदस्य विभक्त्यनुगुणं विशेषणपदस्य विभक्तिः अपि भवति इति दर्शितमस्ति ।

**इदम् अवधेयम्**

***** विशेष्यस्य या विभक्तिः सा एव विभक्तिः विशेषणस्यापि भवति ।

***** पुनः स्मरणीयम्, -------

१. विशेष्यस्य यत् लिङ्गं तदेव लिङ्गं विशेषणस्य अपि भवति।

२. विशेष्यस्य यत् वचनं तदेव वचनं विशेषणस्य अपि भवति।

३. विशेष्यस्य या विभक्तिः सा एव विभक्तिः विशेषणस्य अपि भवति।

एषः नियमः अधस्तन-श्लोकेन दर्शितः। ....

यल्लिङ्गं यद्वचनं या च विभक्तिर्विशेष्यस्य ।
तल्लिङ्गं तद्वचनं सैव विभक्तिर्विशेषणस्य ॥

------

उ) कोष्ठकस्थविशेषणानां समुचितं रूपं विशेष्यानुगुणं लिखत --

उदा-- (चतुर) ........... छात्रेण, .......... महिलया, ............मित्राणि।

उत्तराणि-- "चतुरेण", "चतुरया", "चतुराणि" ।

1) (प्रसिद्ध) ____________ अध्यापकाय। ______________ नायिकायै । ______________ नगरात् ।

2) (नूतन) ______________ भवने । ______________ पत्रिकायाम् । ______________ स्यूते ।

3) (स्वच्छ) ______________ गृहात् । ______________ वस्त्रेण । ______________ दीपम् ।

4) (उन्नत) ______________ गजानाम् । ______________ शिखरेषु । ______________ मन्दिरस्य।

5) (मलिन) ______________ दर्पणे । ______________ छुरिकया । ______________ वस्त्राणाम्।

6) (रिक्त) ______________ हस्ताभ्याम् । ______________ अङ्गुलीषु । ______________ स्यूतान्।

**अत्र भाषाप्रवेशः २ पुस्तकात् पु-सं ४६, अभ्यासः-६ योज्यताम्। (select 10 only.)**

ऊ) कोष्ठकस्थानि विशेषणपदानि क्रमशः उपयुज्य विशेष्यपदानां लिङ्ग-वचन-विभक्त्यनुगुणं वाक्यानि पूरयत।

उदा----भवन्तः दुष्टेभ्यः(दुष्ट) जनेभ्यः दूरे तिष्ठन्तु ; साधुभिः (साधु) जनैः सह स्नेहं वर्धयन्तु ।

1) वयं (दृढ).......... कार्यं कृत्वा संस्कृतभाषां (समग्र)........... विश्वे प्रसारयामः।

2) सः ............लताभ्यः ................पुष्पाणि चिनोति । (कोमल, मनोहर)

3) स्वतन्त्रतासङ्ग्रामे ......... , ............ (अनेक, धीर) युवकाः प्राणार्पणं कृतवन्तः।

4) ..............बालिकाभिः सह क्रीड, न तु ................सह । (विनीत, अविनीत)

5) अहं.............दण्डं कर्तयामि चेत्, द्वौ ............दण्डौ सिद्ध्यतः। (दीर्घ, ह्रस्व)

6) (निपुण)...... रजकः (मलिन)..........वस्त्राणि (स्वच्छ).........जलेन क्षालयति ।

7) (सुन्दरी)..........नार्यः(विशाल)........उद्याने (उत्तम).........बालिकाभिः सह क्रीडन्ति।

8) (ज्येष्ठ)..........सहोदरः (रिक्त्)...........पात्रेषु (शीतल).........जलं पूरयति।

9) (पटु)........ वटवः (मुक्त)..........कण्ठेन (प्रसिद्ध).........वेदमन्त्रान् पठन्ति।

10)(उन्नत)........ वृक्षस्य अधः (कृष्ण)........ धेनुः (कोमल).........तृणानि खादन्ति।

ऋ) उदाहरणानुसारम् उचितेन विभक्तिरूपेण वाक्यनिर्माणं कुरुत ।

उदा-- उत्तमः बालकः अस्ति, तम् आह्वयतु ।

उत्तमं बालकम् आह्वयतु ।

1) दुष्टः पुरुषः अस्ति, तस्मै सर्वे क्रुद्ध्यन्ति ।

2) प्रशान्तः ग्रामः अस्ति, तस्मिन् जनाः वसन्ति ।

3) विशाला वाटिका अस्ति, तस्यां मनोहराः लताः सन्ति ।

4) उत्तमे लेखन्यौ स्तः , ते क्रीणामि।

5) दीर्घाः मागाः सन्ति, तेषु वाहनानि गच्छन्ति।

6) उन्नतानि भवनानि सन्ति, तेषाम् उपरि गन्तुं सोपानानि सन्ति।

7) घोरं काननम् अस्ति तस्मिन् के अपि न सञ्चरन्ति।

8) सरस्वती विद्यादात्री । छात्राः तस्याः पूजां कुर्वन्ति ।

9) सर्वकारस्य नूतनाः योजनाः भवन्ति । ताभिः देशः सुसमृद्धः भवति ।

सर्वनामशब्दानां विशेषणत्वम् ।

एतानि वाक्यानि पठत ।

1) एतत् गृहं विशालम् अस्ति ।

2) सः बालकः मम भगिन्याः पुत्रः अस्ति ।

3) तं बालकं अत्र आनयामि ।

4) तस्मै बालकाय पुस्तकं क्रीणामि ।

5) तस्मात् बालकात् धनं न स्वीकरोमि ।

6) तस्य बालकस्य नाम राघवः । अन्यस्य बालकस्य नाम किम् ?

7) येन हस्तेन खादति, तं हस्तं क्षालयतु ।

8) या नारी नद्याः तीरे तिष्ठति, तां नारीम् आह्वयतु ।

9) काभ्यः बालिकाभ्यः पुस्तकानि ददाति? तासां सर्वासां बालिकानां नामानि लिखतु ।

**अवधेयम् ।**

तद्, एतद्, यद्, किम्, सर्व, अन्य, अस्मद्, युष्मद्, भवत्- इत्यादयः शब्दाः सर्वनामशब्दाः इति उच्यन्ते । एते शब्दाः विशेषणत्वेन अपि कार्यं कुर्वन्ति । अत्रापि विशेषण-विशेषशब्दयोः लिङ्ग-वचन-विभक्तीनां पूर्वोक्तनियमः अन्वेति ।

अभ्यासः - (१).........(अत्र भा.प्र..२ पुस्तकात् पु.स~- ५३, अ-३ योज्यताम्।)

अभ्यासः - (२)..

अस्मद्, तद्, एतद्, भवान्, किम्, सर्व....इत्येतेषां सर्वनामशब्दानाम् उचितैः रूपैः रिक्तस्थानानि पूरयत---

(वस्त्रापणे संभाषणम्) ।

आपणिकः - आगच्छतु, आगच्छतु । सुप्रभातम्, किम् इच्छति ...........?

ग्राहकः - सुप्रभातम् । अहं शाटिकाः, युतकानि, करवस्त्राणि इत्यादीनि वस्तूनि क्रेतुमिच्छामि ।

आप - अत्र आगच्छतु। .....युतकानि पश्यतु। ......... ........... वर्णम् इच्छति?

ग्राहकः - नीलं, पीतं वा ।

आप - पश्यतु ..........वस्त्राणां वर्णः नीलः, ..........च पीतः ।

ग्रा - .............वर्णः अपगच्छति वा इति सन्देहः ...।

आप - कदापि न । वस्त्राणां वर्णापगमः नैव भविष्यति ।

ग्रा - भवतु ।.........युतकं ददातु ।

आप - ......तथा एव भवतु। अन्यत् ........ददानि ?

ग्रा - अत्र शाटिकाः सन्ति किम् ?

आप - कुतो न ? .....सर्वाः शाटिकाः एव । पश्यतु ।

ग्रा - ............शाटिकानाम् मूल्यम् अधिकं इति भासते ।

आप - किन्तु ........ शाटिकानां वैशिष्ट्यमपि अधिकं श्रीमन् । अत्र आगच्छतु, यदि .............इच्छति, तर्हि अन्याः शाटिकाः अपि दर्शयामि । पश्यतु । .............न्युनमूल्यकाः । परन्तु एतासां गुणवत्ताविषये किमपि न प्रमाणम् । ........दीर्घकालं उपयोक्तुं योग्याः अपि नैव ।

ग्रा - (एतत्)............. शाटिकायाः मूल्यं किम् ?

आप - ५० डालराणि ।

ग्रा - (तत्)............. शाटिकायाः मूल्यम् ?

आप - ७५ डालराणि । परन्तु ...........गुणवत्ता अपि अधिका ।

ग्रा - आपणे (सर्व) .......... वस्तूनां विक्रयणे भवान् महान् चतुरः अस्ति भोः । अस्तु, (तत्)..........शाटिकामेव ।

आप - स्वीकरोतु श्रीमन्, धन्यवादाः, पुनः आगच्छतु । नूतनानि वस्तूनि आनेष्यामि ।

ग्रा - अस्तु भोः, धन्यवादाः ।

**ॠ) अधोनिर्दिष्टेषु वाक्येषु विशेषणपदानि परिष्कृत्य रिक्तस्थानेषु लिखत ।**

उदा..... (एतया) ..एतेन..छात्रेण सह अहं पठामि ।

1) (एतस्मात्) .............बालकेभ्यः पुस्तकानि ददातु ।

2) (कस्मै) ................गृहे भवान् वसति ?

3) (तयोः) .........बालिकाभ्याम् जनकः मोदकान् दत्तवान् ।

4) (एते) ...........चित्राणि अहं क्रीणामि ।

5) (तौ) ........... महिले सम्यक् गायतः ।

6) (तम्) ...........सेवकाय वेतनं ददातु ।

ए) अधः दत्ते वाक्यद्वये प्रथमवाक्ये प्रयुक्तस्य सर्वनामशब्दस्य उचितरूपमेव द्वितीये वाक्ये रिक्तस्थाने लिखत ।-

उदा - एषः वृक्षः । (एतस्य) वृक्षस्य फलानि मधुराणि सन्ति ।

1) ताः नर्तक्यः । ............ नर्तकीनां नृत्यकार्यक्रमः अद्य अस्ति ।

2) एतौ चतुरौ । ..............चतुराभ्यां पारितोषिकं ददातु ।

3) सा नदी ।..............नद्याम् बहवः नक्राः सन्ति ।

4) सः सह्यपर्वतः । ........... पर्वतात् तिस्रः नद्यः प्रभवन्ति ।

5) ते शिक्षिके । ................शिक्षिकयोः पाठनेन छात्राः तुष्यन्ति ।

6) ते गुरवः ।................गुरून् वयं प्रणमामः ।

7) ताः धेनवः । ............धेनुषु एका कपिला अस्ति।

8) ताः नलिकाः ।............. नलिकाभ्यः जलं स्रवति ।

**पाठः - धीरा बाला**

तत् एकं प्रसिद्धं नगरम् । तस्य नगरस्य मध्ये काचित् नदी सर्वदा जलपूर्णा प्रवहति । तां नदीम् उभयतः सुन्दरैः वृक्षैः मनोहराभिः लताभिः सङ्कीर्णः कश्चन सुन्दरः प्रदेशः वर्तते । तस्याः नद्याः अपरे पार्श्वे प्रतिवर्षं काचित् मेला प्रचलति स्म। तस्यां मेलायां भागं ग्रहीतुं बहुभ्यः ग्रामेभ्यः बह्वः जनाः नौकया नदीं तीर्त्वा आगच्छन्ति स्म । कदाचित् पञ्चवर्षीया बाला एका तस्याः पित्रा सह मेलां द्रष्टुंम् प्रस्थितवती । सा बाला अतीव समर्था, धीरा, चतुरमती च आसीत् । विविधासु विद्यासु पारङ्गता अपि ।

मेलां गन्तुं नौकया सवेषां प्रयाणम् आरब्धम् अभवत् । तस्यां नौकायांम् अधिकः जनसम्मर्दः आसीत् । यदा सा नौका नद्याः मध्यभागम् आगता, तदा तस्याः नद्याः अन्यस्मात् तीरात् द्वौ पुरुषौ भीत्या, त्वरया च जले तरन्तौ तस्याः नौकायाः समीपम् आगच्छतः स्म । तयोः पृष्ठतः एकः नक्रः तौ अनुसरति स्म । एतस्यां नौकायां ये जनाः आसन्, ते सर्वे भीत्या, शङ्कया च तं नाविकम् अवदन्- "भोः, कृपया नौकां वेगेन अग्रे चालयतु । अन्यथा एतस्मात् नक्रात् महान् अपायः सम्भवति'इति । सर्वेषाम् मुखे भयस्य, आतङ्कस्य छाया आसीत् । एतस्याः बालिकायाः मुखे अपि भीतिः एव । परन्तु तस्याः भीतिः स्वविषये न आसीत् । नद्यां यौ पुरुषौ आगच्छतः स्म तयोः रक्षणं कथं करणीयम् इति चिन्ता एव आसीत् । तयोः भयपूर्णं क्रन्दनं श्रुत्वा सा बालिका पितरम् अपश्यत् । तस्य अनुमतिं विना एव सा तस्यां नद्यां कूर्दितवती । तस्मिन् जले मीनः इव सुलभेन तरणं कृत्वा सा बालिका तयोः पुरुषयोः हस्तौ दृढं गृहीत्वा नौकां प्रति शीघ्रम् आनीतवती ।

एतां घतनां दृष्ट्वा सर्वे जनाः आश्चर्येण स्तब्धाः अभवन् । तस्याः बालिकाय़ाः पिता अपि तां प्रशंसितवान् । सर्वे जनाः तां बहुधा प्रशंस्य अभिनन्दितवन्तः । बाल्यावस्थायाम् एव एतादृशं साहसं या प्रदर्शितवती सा एव

भारतस्वातन्त्र्यसङ्ग्रामे महाकाली इव युद्धं कृत्वा आङ्ग्लेयान् प्रकम्पितवती राज्ञी लक्ष्मीबाई । तस्याः विषये "क्रान्तिकारिणां सर्वेषां मध्ये अत्यन्तं साहसवती, सर्वेभ्यः अत्युत्तमा सेनानेत्री च राज्ञी लक्ष्मीबाई " इति वदति तया सह युद्धं कृतवत्सु (ये युद्धं कृतवन्तः तेषु) अन्यतमः सर् रोज् नामकः आङ्ग्लसेनापतिः ।

**अभ्यासः**

एतस्यां कथायां स्थितानि सर्वाणि विशेषणानि चित्वा लिखत । तेषु कानिचन १०-१५ विशेषणपदानि उपयुज्य वाक्यानि लिखत ।

# 18. कथा

पुरा मन्दकूर्दः नाम मर्कटः आसीत् । सः अन्येषां मर्कटानाम् अपेक्षया बलहीनः आसीत् । अन्ये कपयः तं भृशं पीडयन्ति स्म । अतः मन्दकूर्दः अतीव दुःखितः आसीत् ।

एकदा सः मातरम् उपगम्य पृष्टवान्,“हे मातः । अन्ये कपयः इव किमर्थम् अहं बलिष्ठः नास्मि?” इति ।

“किं करवाणि, पुत्र? ब्रह्मदेवः एव जानाति । सः एव त्वां बलिष्ठं कर्तुं शक्नोति ।” इति सा प्रीत्या प्रतुक्तवती ।

मन्दकूर्दः आरात्रं “ब्रह्मदेवं पृच्छानि । ब्रह्मदेवं पृच्छानि ।” इत्येव चिन्तितवान् । परेद्युः सः शीघ्रम् उत्थाय वनस्य अपरं भागं गत्वा तपसाचरणम् आरब्धवान् । अचिरं ब्रह्मदेवः मन्दकूर्दस्य भक्त्या प्रीतः अभवत् । सः आविर्भूय, “हे मन्दकूर्द, वरं वृणीष्व” इति उक्तवान् ।

मन्दकूर्दः देवं प्रणम्य उक्तवान्, “एते मम नेत्रे सुष्ठु न पश्यतः । एतौ मम कर्णौ सुष्ठु न शृणुतः । एतौ मम हस्तौ सुष्ठु न गृह्णीतः । एतौ मम पादौ सुष्ठु न कूर्दते । एवं मम सर्वाणि अङ्गानि सुष्ठु न भवन्ति । अतः सर्वे वानराः मां पीडयन्ति । यदि एते मम नेत्रे सुष्ठु द्रक्ष्यतः,  एतौ मम कर्णौ सुष्ठु श्रोष्यतः,  एतौ मम हस्तौ सुष्ठु ग्रहीष्यतः, एतौ मम पादौ सुष्ठु कूर्दिष्येते, तथा हि मम सर्वाणि अङ्गानि सुष्ठु भविष्यन्ति, तर्हि इतरे मर्कटाः मां न पीडयिष्यन्ति । तदा अहं सुखेन जीविष्यामि । तथा अनुगृह्णातु ।“ इति ।

करुणया आविष्टः ब्रह्मदेवः, “तथास्तु । इदम् अस्ति अमृतफलम् । बलहीनाः एतत् फलं खादिष्यन्ति चेत् बलिष्ठाः भविष्यन्ति; रुग्णाः भोक्ष्यन्ते चेत् रोगमुक्ताः भविष्यन्ति; मृताः फलरसं पास्यन्ति चेत् जीविताः भविष्यन्ति । त्वं फलं स्वीकुरु । सायंकाले यदा सूर्यः अस्तं गच्छति तदा अमृतफलं खाद । तेन बलिष्ठः भविष्यसि ।“ इति अनुगृहीतवान् ।

मन्दकूर्दः फलं प्राप्य आनन्देन मातरं प्रति प्रस्थितवान् । मार्गे सूर्यास्तसमयः जातः । सः फलं खादितुं प्रवृत्तः । तदा एव “हा, हा, वत्स, वत्स” इति रोदनं श्रुतवान् । किञ्चित् दूरं गत्वा सः कांश्चन महिलां दृष्टवान् । तस्याः पुत्रः मृतः सद्यः एव आसीत् । “मम पुत्रः सर्पेण दष्टः । हा, हन्त, हन्त ।“ इति सा आक्रन्दितवती ।

तत् श्रुत्वा झटिति एव मन्दकूर्दः अमृतफलस्य रसं कृत्वा, “एषः अमृतफलरसः” इति उक्तवान् । तस्याः पुत्राय दत्तवान् च । रसं पीत्वा मृतः जीवितः अभवत् । तस्मिन् क्षणे एव माता च पुत्रः च अन्तरभवताम् । । वनदेवता च आविरभवत् ।

“हे मन्दकूर्द, तव परीक्षार्थम् एव एतौ मातापुत्रौ सृष्टवती ।त्वं स्वार्थेन विना अमृतफलं अन्यस्मै दत्तवान् इति दृष्ट्वा सनुष्टा अस्मि । अद्य प्रभृति त्वं बलिष्ठः बुद्धिमान् च भविष्यसि”, इति वनदेवता मन्दकूर्दम् उक्तवती । सः आश्चर्येण मातरं वक्तुं अधावत् ।

**अ) एतेषां प्रश्नानाम् उत्तरं लिखत ।**

1) मन्दकूर्दः किमर्थं दुःखितः आसीत् ?

2) मन्दकूर्दः कं द्रष्टुं तपसाचणं अकरोत्?

3) ब्रह्मदेवः मन्दकूर्दाय किं दत्तवान् ?

4) अमृतफलस्य महत्त्वं किम्?

**आ) पर्यायपदानि लिखत ।**

यथा – जलम् = तोयं, नीरं, पयः

वनम् =

वानरः =

वृक्षः =

पुत्रः =

कूर्दनम् =

नेत्रम् =

हस्तः =